No. १६४६

Title शारीरिक मीमांसा भाष्यस्य २य अध्या-यस्य ३य. ४र्थ. पादौ

Author श्री शंकराचार्यः

Extent ४० Age ५

Subject वेदान्त शास्त्रं

शारीरकमीमांसाभाष्यस्य द्वितीयाध्यायस्य तृती
य चतुर्थपादौ

१६५७

४०

न वियदश्रुतेः ।१। वेदांतेषु तत्र तत्र भिन्नप्रस्थाना उत्पत्तिश्रुतय उपलभ्यंते केचिदाकाशस्योत्पत्तिमामनंति केचिन्ना
तथा केचिद्वायोरुत्पत्तिमामनंति केचिन्नेवं जीवस्य प्राणानां चैवमेव क्रमादिव्युत्क्रमकृतोपि विप्रतिषेधः श्रुत्यंतरेषु
लक्ष्यते । विप्रतिषेधाच्च परपक्षाणामनपेक्षितत्वं स्थापितं तद्वत्स्वपक्षस्यापि विप्रतिषेधादेवानपेक्षितत्वमाशंक्येत
इत्यतः सर्ववेदांतगतसृष्टिश्रुत्यर्थनिर्मलत्वाय परः प्रपंच आरभ्यते । तदर्थनिर्मलत्वे च फलं यथोक्ताशंकानिवृ
त्तिरेव । तत्र प्रथमं तावदाकाशमाश्रित्य चिंत्यते । किमस्याकाशस्योत्पत्तिरस्ति उत नास्तीति । तत्र तावत्प्रतिपद्यते न वियदश्रु
तेरिति । न खल्वाकाशमुत्पद्यते कस्मात् अश्रुतेः । नह्यस्योत्पत्तिप्रकरणे श्रवणमस्ति । छांदोग्ये हि सदेव सोम्येदमग्र
आसीदेकमेवाद्वितीयमिति सच्छब्दवाच्यं ब्रह्म प्रकृत्य तदैक्षत तत्तेजोसृजतेति च पंचानां महाभूतानां मध्य
मं तेज आदिं कृत्वा त्रयाणां तेजोबन्नानामुत्पत्तिः श्राव्यते । श्रुतिश्च नः प्रमाणमतींद्रियार्थविज्ञानोत्पत्तौ । न चात्र
श्रुतिरस्त्याकाशस्योत्पत्तिप्रतिपादिनी । तस्मान्नास्त्याकाशस्योत्पत्तिरिति । अस्ति तु ।२। तु शब्दः पक्षांतरपरिग्रहे । मा नामा
काशस्य छान्दोग्ये भूदुत्पत्तिः श्रुत्यंतरे त्वस्ति तैत्तिरीया हि समामनंति । सत्यं ज्ञानमनंतं ब्रह्मेति प्रकृत्य तस्माद्वा ए

शा·भा· तस्माद्वा एतस्मादात्मन आकाशः संभूत इति। ततश्च श्रुत्योर्विप्रतिषेधः क्वचित्तेजःप्रमुखा सृष्टिः क्वचिदाकाशप्रमुखेति। नन्वेकवा
क्यतानयोः श्रुत्योर्युक्ता। सत्यं युक्ता। न तु साधिगंतुं शक्यते। कुतः। तत्तेजोऽसृजतेति सकृच्छ्रुतस्य स्रष्टुः स्रष्टव्यद्वयेन संबं ६१
धानुपपत्तेः। तत्तेजोऽसृजत तदाकाशमसृजतेति। ननु सकृच्छ्रुतस्यापि कर्तुः कर्तव्यद्वयेन संबंधो दृश्यते। यथा सू
पं पक्त्वौदनं पचतीति। एवं तदाकाशं सृष्ट्वा तत्तेजोऽसृजतेति योजयिष्यामि। नैवं युज्यते। प्रथमजत्वं हि छांदोग्ये तेजसोऽवग
म्यते। तैत्तिरीयके चाकाशस्य। न चोभयोः प्रथमजत्वं संभवति। एतेनेतरश्रुत्यक्षरविरोधोऽपि व्याख्यातः। तस्माद्वा एतस्मा
दात्मन आकाशः संभूत इत्यत्रापि तस्मादाकाशः संभूतस्तस्मात्तेजः संभूतमिति सकृच्छ्रुतस्यापादानस्य संभवनस्य
च वियत्तेजोभ्यां युगपत्संबंधानुपपत्तेः। वायोरग्निरिति च क्रमस्मरणात्। अस्मिन्विप्रति षेधे कश्चिदाह। गौरप संभवा
त्॥३॥ नास्ति वियदुत्पत्तिरश्रुतेरेव। या त्वितरा वियदुत्पत्तिवादिनी श्रुतिरुदाहृता सा गौणी भवितुमर्हति। कस्मादसंभ श्रीरामचंद्रमंजे
वात्। न ह्याकाशस्योत्पत्तिः संभावयितुं शक्या श्रीमत्कणभुगभिप्रायानुसारिषु जीवत्सु। ते हि कारणसामग्र्यसंभवा
दाकाशस्योत्पत्तिं वारयंति। समवाय्यसमवायिनिमित्तकारणेभ्यो हि किल सर्वमुत्पद्यमानमुत्पद्यते। द्रव्यस्य चैकजा

संभाव्यते प्रागुत्पत्तेः प्रकाशादिकार्यं न बभूव पश्चाद्बभूवेति तत्काशस्य पुनः पू
र्वोत्तरकालयोर्विशेषः ३

तीयकमनेकं च द्रव्यं समवायिकारणं भवति न चाकाशस्यैकजातीयकमनेकं द्रव्यमारंभकमस्ति यस्मिन्समवायिकार
णे सत्समवायिकारणं च तत्संयोगेनाकाशमुत्पद्येत न हि भावाद्गुणदृष्टेरप्रवृत्तिर्निमित्तकारणं द्रव्यं प्रति मेवाकाशस्य
भवति उत्पत्तिमतां चोत्पत्तेः प्रभृति नाश्वर्वोत्तरकालयोर्विशेषः संभाव्यते किं प्रागुत्पत्तेरनवकाशमसुषिरमच्छिद्रं
बभूवेति शक्यतेऽध्यवसातुं पृथिव्यादिवैधर्म्याच्च विभुत्वादिलक्षणादाकाशस्याजत्वसिद्धिः तस्माद्यथा लोके आकाशं कुर्वी
काशं जानीमि एवं जातीयको गौणः प्रयोगो भवति यथा च यदाकाशः करकाकाशो गृहाकाशः इत्येकस्याप्याकाशस्यैवं जा
तीयको गौणः प्रयोगो भवति वेदेष्वारण्यानाकाशेष्वालभेरन्निति एवममृतत्वश्रुतिरपि गौणी द्रष्टव्या ब्रह्म आकाशः
खल्वणाकाशस्याजत्वं ख्यापयति यत्त आह वायुश्चान्तरिक्षं चैतदमृतमिति न त्वमनुतस्यामृतत्वं मृत्युपपद्यते आकाशवत्सर्व
गतश्च नित्य इति चाकाशेन ब्रह्म नित्यत्वसर्वगतत्वाभ्यां धर्माभ्यामुपमिमान आकाशस्यापि तौ धर्मौ सूचयति न च तादृशस्यो
त्पत्तिरुपपद्यते स यथानन्तोयमाकाश एवमनन्त आत्मा वेदितव्य इति चोदाहरणम् आकाशशरीरं ब्रह्म आकाश आत्मेति च
न ह्याकाशस्योत्पत्तिमत्त्वे ब्रह्मणस्तेन विशेषणं संभवति नीलेनेवोत्पलस्य तस्मान्नित्यमेवाकाशेन साधारणं ब्रह्मेति

शां॰भा॰

2

गम्यते। स्याद्वैकस्य ब्रह्मणः शब्दवत्ता। पादद्वयं पदेऽन्तरसत्त्वं। सात्ते(?)रेक पंपनरेक स्य संभूतशब्दस्य तस्माद्दृष्ट(?)ए तस्मादात्मन

श्राकाण्यः संभूत इत्यस्मिन्नधिकारे परे क्षेत्रज्ञः प्रमतिष्वनुवर्तमानसमुत्थत्वं संभवत्याकाशोत्पत्तौ च गौणत्वमिति। अत्रउ

त्तरमुच्यते। स्याद्वैकस्यापि संभूतशब्दस्य विषयविशेषवशाद्गौणत्वं मुख्यत्वं प्रयोगो वृद्धस्य शब्दस्य यथैकस्यापि ब्रह्म

शब्दस्य तपस्यान्नं ब्रह्म विजिज्ञासस्व तपो ब्रह्मेत्यस्मिन्नधिकारेऽन्नादिषु गौणः प्रयोगः आनन्दे च मुख्यः यथा च तपसि

ब्रह्मविज्ञानसाधने ब्रह्मशब्दो भक्त्या प्रयुज्यते। अंजसा तु विज्ञेये ब्रह्मणि तद्वत्। कथं पुनरनुत्पत्तौ नभस एकमेवाद्वि

तीयमिति प्रतिज्ञायमानत्वान्न भसा द्वितीयेन सद्वितीयं ब्रह्म प्राप्नोति। कथं च ब्रह्मणि विदिते सर्वे विदितं स्यादि

ति। तदुच्यते। एकमेवेति तावत्स्वकार्यापेक्षयोपपद्यते। यथा लोके कश्चित्कुंभकारकुले पूर्वेद्युर्मृद्दंडचक्रादीनि चोपल

भ्यापरेद्युश्च नानाविधान्यमत्राणि प्रसारितान्युपलभ्य ब्रूयात् मृदेवैका किलासीत्पूर्वेद्युरिति। स च तयावधारणया मृत्का

र्यजातमेव पूर्वेद्युर्नासीदित्यभिप्रेयात् न दंडचक्रादिकमपि तद्वद्द्वितीयपर्युक्तिश्रुधिष्ठात्रंतरं वारयति। यथा मृदोऽमत्र

प्रकृतेः कुंभकारोऽधिष्ठाता दृश्यते नैवं ब्रह्मणो जगत्प्रकृतेरन्योऽधिष्ठातास्तीति। न च नभसापि द्वितीयेन सद्वितीयं ब्रह्म

एम॰

प्रसन्नेतोलस्य णामव्रतनिमित्तं हि नाना त्वं नव प्राज्ञमन्ने ब्रह्मन भमसोर्हम्य णामयत्वमस्ति तस्यो ऐदं कथोरिव संसृष्टयोर्मोपि
त्वामर्त्येत्वादिक्षुर्मे सामान्यात् तास्मर्गकालेनु ब्रह्म जगदुत्पादयितृ पतनं स्थितिं तं चेतर तिष्ठतिरे नान्यत्वमवसीयते तत्याकाश
शरीरं ब्रह्मेत्यादिश्रुतिभ्योपि ब्रह्माकाशयोरभेदोपचारसिद्धिः अत एव ब्रह्मविज्ञानेन सर्वविज्ञानसिद्धिरपि च सर्वकार्यस्य
मध्यमानमाकाशेनाव्यतिरिक्तदेशकालमेवोपलभ्यते ब्रह्मणश्चाव्यतिरिक्तदेशकालमेवाकाशं भवतीत्यतो ब्रह्मणस्तत्का
र्यस्य च विज्ञातेन सह विज्ञातमेवाकाशं भवति यथा क्षीरे प्रक्षिप्तं घटे कतिचिदुदबिन्दवः प्रक्षिप्ताः क्षीरग्रहणेनैव गृह्यन्ते तद्भ
वंति न हि क्षीरग्रहणादुदबिन्दुग्रहणं परिशिष्यते एवं ब्रह्मणा तत्कार्यैश्चाव्यतिरिक्तदेशकालत्वाद्गृहीतमेव ब्रह्मणैव ग्रह
णेन न भो भवति तस्माद्ब्रह्माकाशयोः संभवत्यवधारणा मिथ्येवं प्राप्ते ऽस्माभिः प्रतिज्ञाहानिर्व्यतिरेके कार्यस्य ॥६॥ येनाश्रुतं श्रु
तं भवत्यमतं मतमविज्ञातं विज्ञातमिति आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितमिति कस्मिन्नु भगवो विज्ञाते स
र्वमिदं विज्ञातं भवतीति नैकाचनमद्वितीयमित्याद्यास्वीतिचैवं रूपा [illegible] विज्ञापते तस्याः प्रतिज्ञाया एवमहानिरनुपरोधः स्यात् पृथ
व्यतिरेकः कृत्स्नस्य वस्तुजातस्य विज्ञेयाद्ब्रह्मणः स्याद्व्यतिरेके हि सत्येकविज्ञानेन सर्वं विज्ञायत इत्येतां प्रतिज्ञां हापयेत्सवा

शतत्वेदांतं प्रतिज्ञा २

२

शा॰भा॰ 3

व्यतिरेक एवमुपपद्यते। यदि कृत्स्नं वस्तुजातमेकस्माद्ब्रह्मण उत्पद्येत। शब्देभ्यश्च प्रकृतिविकाराव्यतिरेकस्यायेनैव
प्रतिज्ञासिद्धिरवगम्यते। तथाहि येनाश्रुतं श्रुतं भवतीति प्रतिज्ञाय मृदादिदृष्टान्तैः कार्यकारणाभेदप्रतिपादनपरैः
प्रतिज्ञैषा समर्थ्यते। तत्साधनायैव चोत्तरे शब्दाः सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत तत्तेजोऽसृ
जतेत्येवं कार्यजातं ब्रह्मणः प्रदर्श्याव्यतिरेकं प्रदर्शयन्ति। ऐतदात्म्यमिदं सर्वमित्यारभ्याप्रपाठकपरिसमाप्तेः। तद्यद्याका
शं न ब्रह्मकार्यं स्यात् न ब्रह्मणि विज्ञाते आकाशं विज्ञायेत। ततश्च प्रतिज्ञाहानिः स्यात्। न च प्रतिज्ञाहान्या वेदस्याप्रामा
ण्यं युक्तं कर्तुम्। तथा प्रतिवेदान्तं ते ते शब्दास्तेन तेन दृष्टान्तेन तामेव प्रतिज्ञां ज्ञापयन्ति। इदं सर्वं यदयमात्मा। ब्रह्मैवेद
ममृतं पुरस्तादित्येवमाद्यः। तस्माज्ज्वलनादिवदेव गगनमप्युत्पद्यते। यदुक्तमश्रुतेर्न वियदुत्पद्यत इति। तदयुक्तम्। वि
यदुत्पत्तिविषयश्रुत्यन्तरस्य दर्शितत्वात्। तस्माद्वा एतस्मादात्मन आकाशः संभूत इति। सत्यं दर्शितं विरुद्धं तु तत्ते रम॰
जोऽसृजतेत्यनेन श्रुत्यन्तरेण। नैकवाक्यत्वात् सर्वेषां श्रुतीनां। भवत्वेकवाक्यत्वमविरुद्धानाम्। इह तु विरोध उक्तः। सकृच्छ्रुत
स्य स्रष्टुः स्रष्टव्यद्वयसंबन्धासंभवात्। द्वयोश्च प्रथमजत्वासंभवाद्विकल्पासंभवाच्चेति। नैष दोषः। तेजःसर्गस्य तैत्तिरी

पकेत्वोपलक्षणत्वेन तस्माद्वा एतस्मादात्मन आकाशः संभूतः आकाशाद्वायुः वायोरग्निरित्यत्र क्वाहोयं श्रुतिरत्राप्याध
रितोक्तं। यथा अपरितोक्तं छांदोग्यश्रुतिस्तद्वाकाशं वा पुंचस्व ष्वत्तेजोऽसृजतेति। न होयं श्रुतिस्तेजो जनित्रधामासती श्रुतं
तरप्रसिद्धमाकाशस्यासन्निधवारश्यितं शक्नोत्येकस्याकाशस्य व्यापारद्वयासंभवात्। न ह्येकोपि क्रमेणानेकं स्रष्टव्यं
संकेतितैकवाक्यकल्पनायां संभवमात्रविरुद्धार्थत्वेन श्रुतिर्न व्याख्यातास्माभिः स्वकृत्यनुसरस्रष्टुः स्रष्टव्य
द्वयसंबंधोभिप्रेयते। श्रुत्यंतरवशेन स्रष्टव्यांतरोपसंग्रहो यथा च सर्वं खल्विदं ब्रह्म तज्जलानिति। तत्र साक्षादेव स
र्वस्य वस्तुजातस्य ब्रह्मजत्वं स्वरूपमात्रेण न प्रदेशांतरविहितं तेजः प्रभृतत्वमतिक्रमं वायोरपि। एवं तेजसोपि ब्रह्मजं
त्वं स्वरूपमात्रेण श्रुत्यंतरविहितं नभःप्रभृत्वमतिक्रमं निवारयितुमर्हति। न तु ग्रामविधानार्थमनेनाहूक्तं तज्जलानिति शां
त उपासीतेति श्रुतेः। नेतत्सृष्टिवाक्यं तस्मादेतस्मादेशांतरप्रसिद्धं क्रमं गंतुरोद्धुमर्हति। तत्तेजोऽसृजतेति त्वेतत्सृष्टिवा
क्यं तस्मादत्र यथाश्रुतिक्रमो ग्राह्यो न तन्मद्धतिनेत्युच्यते न हि तेजःप्राथम्यात्तरोधे न श्रुत्यंतरप्रसिद्धो विपर्ययस्तात्पर्यः परि
सक्रयो भवति। एतत्तात्पर्यधर्मत्वात्क्रमस्यापि च तत्तेजोऽसृजतेति च नात्र क्रमस्य वाचकः कश्चिच्छब्दोस्ति। अर्थात्तु क्र

शा.भा.

५

मोऽवगम्यते। सच वा पौरस्त्यैरितनेन शास्त्रेण प्रसिद्धेनक्रमेण निवार्यते। विकल्पसमुच्चयौ तु विपत्तेन सोऽप्रथम
न विषयावसंभवानभ्युपगमाभ्यां निवारितौ। तस्मात्त्वास्तित्वमोऽर्थिप्रतिषेधोपि च छान्दोग्ये येनाश्रुतं श्रुतं भवति। मेतांप्र
तिज्ञातं वाक्योपक्रमश्रुतं समर्थयितुमसमाम्नातमपि विपद्यत्यनौपसंख्यातव्यं किमंगपुनस्सैत्रिष्यपि केसमाम्नातं न
संगच्छते। पश्चेक्रमाकाशस्य सर्वेषानस्पदेशत्वाद्धुः स्सनमहोरव्यतिरेकोपपन्नेरिति। अमुत्रोच्यते। नह्यसौ ऐटकमापे
नेदं एकविज्ञानेन सर्वविज्ञानं नेतं सोम्य दृष्टान्तं प्रणयनाद्धि ब्रह्मति विकारस्यापेन्नेवेदं सर्वविज्ञानं नेतव्यमि
तिगम्यते। स्सौ ऐटकमापेन च सर्वविज्ञानं कल्प्यमानं न सम्यग्ज्ञानं स्यात्। न हि सोरज्ञानमग्रहीत्यो दकस्य सम्य
ग्ज्ञानमग्रहीत्यस्वमस्ति। न च वेद स्वरूपासामिवमायाली कश्चनादिभिर्यावधार्यतामुपपद्यते। सावधारणाच्चेयमेवा
द्वितीयमिति श्रुतिः। स्सौ ऐटकमापे मनीपमानापीद्यते। न च स्वकार्यापेक्ष्य पेटं वस्त्वेकदेशविषयं सर्वविज्ञानमेकाद्वि
तीयत्ववधारणं चेति न्याय्यमष्टादिष्वपि हि तत्संभवात्। न तदेवं वक्तव्यं सम्यग्व्यं भवति। मेतवकेनोपलु सोम्ये
दं महामनामन्नेनूवामानी सर्वोऽयं तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवतीत्यादिना। तस्मात्सर्वविषयमेवेदं एम०

सर्वविज्ञानंसर्वस्यब्रह्मकार्यतापेक्ष्योपन्यस्तमितिद्रष्टव्यं॥यत्पुनरेतदुक्तमसंभवान्नोगगनस्योत्पत्तिश्रुतिरित्यत्र
ब्रूमः॥यावद्विकारंतुविभागोलोकवत्॥७॥तुशब्दोऽसंभवाशंकाव्यावृत्त्यर्थःनखल्वाकाशस्योत्पत्त्यसंभवाशंकाकर्तव्यायतो
यावत्किंचिद्विकारजातंदृश्यतेघटघटिकोदंचनादिवाकटककेयूरकुंडलादिवासूचीनाराचनिस्त्रिंशादिवातावानेववि
भागोलोकेलक्ष्यतेनत्वविकृतंकिंचित्कुतश्चिद्विभक्तमुपलभ्यते॥विभागश्चाकाशस्यपृथिव्यादिभ्योऽवगम्यतेतस्मात्सो
पिविकारोभवितुमर्हति॥एतेनदिक्कालमनःपरमाणूनांकार्यत्वंव्याख्यातं॥नन्वात्माप्याकाशादिभ्योविभक्तइतितस्यापिका
र्यत्वंघटादिवत्प्राप्नोति॥नात्मनआकाशःसंभूतइतिश्रुतेः॥यदिह्यात्मापिविकारःस्यात्तस्मात्परमन्यन्नश्रुतमित्याका
शादिसर्वंकार्यंनिरात्मकमात्मनःकार्यत्वेस्यात्तथाचशून्यवादःप्रसज्येतात्मत्वाच्चात्मनोनिराकरणशंकानुपपत्तिः॥नह्या
त्मागंतुकःकस्यचित्स्वयंसिद्धत्वात्॥नह्यात्मात्मनःप्रमाणमपेक्ष्यसिध्यति॥तस्यहिप्रत्यक्षादीनिप्रमाणान्यसिद्धप्रमेयसिद्ध
येउपादीयंते॥नह्याकाशादयःपदार्थाःप्रमाणनिरपेक्षाःस्वयंसिद्धाःकेनचिदभ्युपगम्यंते॥आत्मातुप्रमाणादिव्यवहारा
श्रयत्वात्प्रागेवप्रमाणादिव्यवहारात्सिध्यति॥नचेदृशस्यनिराकरणंसंभवति॥आगंतुकंहिवस्तुनिराक्रियतेनस्वरूपं॥यएव

शा॰ भा॰ वह्निनिरूपकत्वात्तद्वह्निस्वरूपं न स्वयं ग्रैरीघाप्रमग्निना निरूपितयेति तथा हमेवेदानीं ज्ञानामि वर्तमानं वस्तुत्त्वहमेवातीत
नरं चानास्ति घमहमेवानागतमनागतं नरं च स्वास्वामी स्पती तानागतवर्तमानभावेनास्याभवत्सपि स्वातयेनस्वान्तर
स्याभावोस्ति। सर्वदा वर्त्तमानस्वभावत्वात्तन्न स्याभस्मीभवत्यपि दहेनात्मनउच्छेदो वर्त्तमानस्वभावत्वात्तस्य स्वभा
वत्वं वा संभाव्यपि तुंद्य कर्मेवमप्रमास्वेप स्वभावत्वात्स्वकापत्वमात्मनः। कोर्प त्वं चाकाशस्यापन्न कं समानजातीयमनेकं
कारणद्रव्यं व्योम्नोनास्ति तित्रमत्सव्यते। नतावत्समानजातीयमेवारभते न भिन्नजातीयमिति नियमोस्ति। नहि तंतूनां
नत्संयोगानां च समानजातीयत्वमस्ति द्रव्यत्वगुणत्वाभ्युपगमात्। न च निमित्तकारणानां पितुरीवेमादीनां समानजा
तीयत्वनियमोस्ति। स्यादेतत्समवायिकारणविषय एव समानजातीयत्वाभ्युपगमोनकारणांतरविषय इति। तदप्यनेकां
तिकं। सूत्रगोवालैस्यैनेकजातीयैरेकारज्जुः। समानादृश्यते। तथा सूत्रैर्दृणादिभिश्च विचित्रो कंवलो नितनुते। स च रम०
द्रव्यत्वाद्यपेक्षया वासमानजातीयत्वेकस्मानेनियमानपेक्षां। सर्वस्य सर्वेण समानजातीयत्वात्। नाप्यनेकमेवारं
भते। नैकमिति नियमोस्ति। अणुमनसोराद्यकर्मारंभाभ्युपगमात्। एकैकोहि परमाणुर्मनश्चाद्यं कर्मसमारभते न द्रव्यां

नरैः संहतैस्तैरभ्युपगम्यते द्व्यणुकं महत्त्वानेकारम्भकत्वनियमः इति चेन्न। परिणामाभ्युपगमात्। महत्त्वे द्रव्यत्वनियमोपि दृष्टिसंयोग
सचिवं द्व्यणुकं द्व्यणुकान्तरस्यारम्भकमभ्युपगम्यते तत्र च क्वचिदनेकं परिणामतेम हि जात्यं कुण्ठिभावेन क्वचिदेकं परिणामं प्रतेसी
ए दिदृक्षादिभावे न तेनिम्भरः समस्तेन क्रमेव कारणं कार्यं जनयतीत्यतः श्रीहर्षप्रामाण्यपादेकस्मो हि सूक्ष्मत्वाकाशादि
महाभूतोत्पत्तिक्रमेण जगज्ज्ञातमिति निष्पीपनेत्र यथा च क्रमपसंहारश्रुतौ नान्येति चेत्सीरवद्धौ ति। पञ्चीनमाकाशस्योत
तो नेपश्चीनरकालयोर्विशेषः संभावयितुं शक्यते इति तत्र दृष्टं पनेवांहि विभ्रमेणाट्टपि व्याप्तिभावो व्यतिरेकमानेन भः
स्वरूपवदिष्टा नाम ध्यवसीयते। सएव विशेषः प्रागभावप्रतिनासौ दृतिगम्यते। यथा च बलनस्य लादिभिः ट्टपिव्यादि स्वभा
वैः स्वभाववदस्य लमनन्यविमादिस्तुतिभ्य एवमाकाशस्वभावेनापि नस्वभाववदनाकाशमितिष्यतेर वगम्यते। तस्मा
त्प्रागसन्नेरनाकाशलमचित्रं पदप्युक्तं पृथिव्यादिवैधर्म्यादाकाशस्याजत्वमिति। तदप्यसच्छ्रुतिविरोधे सत्यस्य संभवा
नुमानस्याभासत्वोपपत्तेः। सत्यनुमानस्यवदर्शितत्वादनित्यमाकाशम निमग्णात्प्रयत्नो हूणादिवदिसादिप्रयोग
संभावाच्चात्मनानेकोत्तिकत्वमिति चेन्नात्मनः सोपनिषदं प्रति अनिमग्णात्प्रपत्तासिद्धेर्विभलोदाह्नं चाकाशेस्योत्प

ब्र:भा:
6

त्तिवादिनं प्रत्यसिद्धत्वात्तत्पक्षे तच्छब्दाद्येति। न चाप्तत्वश्रुतिस्तावद्विपत्समतादिवाक्यस्येति वद्दृष्टयोगस्त्रिप्रलपयो
रुपपादितत्वात् शब्दकाण्डे वक्ष्यमाणत्वात्सर्वगतत्वनित्यत्वद्रव्यत्वमहत्त्वेन काशे मोपमानं निक्षिप्यते निरतिशयपरमहत्त्वायनाकाश
सममत्वापायापेक्षपरिवर्त्तविस्ताधावतीति हि प्रागतत्वात्प्रोच्यते। नेष्टु स्वगतत्वापत्तद्धतात्। एतेनानन्तत्वोपमानश्रुतिर्व्या
ख्याता। ज्यायानाकाशादिमादिश्रुतिमप्युद्धृत्य आकाशस्यापि परिमाणत्वसिद्धेः। न तत्सप्रतिमास्तीति च ब्रह्म
णोऽनुपमानत्वं दर्शयते। नान्यदतोऽस्तीति च ब्रह्मणः स्वमहिमाकाशहेतोमार्त्तत्वं दर्शयति। तत्पक्षे ब्रह्मत्वभ्रष्टदाकाशस
न्नास्तुतेः गौणत्वमिति न तदाकाशसंभवश्रुतेरनुमानाभ्यां परित्यज्य तं तस्माद्वैदूष्यकार्यं विपद्यतीति सिद्धं॥ एतेन मात
रिश्वा व्याख्यातः॥८॥ अतिदेशोपमेनेन विपक्षव्याख्यानेन मातरिश्वापि विपक्षस्य पोवाच व्याख्यातः। तत्राप्येतेप्याचार्याः प्रयोगं
पक्षारचयितव्याः। नवापुरुषस्यते छांदोग्यानामुपसत्तिप्रकरणे न्यादिसेकः पक्षः। अस्ति तु तैत्तिरीयाणामुपसत्तिप्रक राम०
रणे आम्नानमाकाशाद्वायुरिति प्रस्तावं तत्र श्रुत्योर्विप्रतिषेधे सति गौणी वायोरुत्पत्तिश्रुतिरसंभवादिति पूर्वपक्षाभिप्रायः।
असंभवस्यैषा न स्मृतिता देवतापद्यते रिष्यमाणप्रतिषेधात् अमृतादिव्यवर्णाद्यो। प्रतिज्ञाहानपरोधपावहिकारं च

विभागाभ्युपगमादुत्पद्यते चापर इति स्थितं ॥ अत्र समभवप्रतिषेधोऽपरः वियदादिविषय आपेक्षिकोऽस्त्याकाशादीनामिव वायोरस्त
मनाभावात् । कृतप्रतिविधानं चामृतत्वादिश्रवणं । ननु वायोराकाशस्य च तुल्ययोरुत्पत्तिप्रकरणे श्रवणाद्योरेकमेवा
धिकरणमुभयविषयमस्तु किमतिदेशेनासति विशेषे । उच्यते सत्यमेवमेतत् तथापि मन्दधियां शब्दमात्रकृतां शंकानिव
र्त्यायमतिदेशः क्रियते । संवर्गविद्यादिषु ह्युपास्यत्वाय वायोर्महाभाग्यत्वश्रवणादस्तमयप्रतिषेधादिभ्यश्च भवति नित्य
त्वाशंका कस्यचिदिति ॥ ८ ॥ असंभवस्तु सतोऽनुपपत्तेः ॥ ९ ॥ वियत्पवनयोरसंभाव्यमानजन्मनोरप्युत्पत्तिमुपश्रुत्य ब्रह्मणो
ऽपि भवेत् कुतश्चिदुत्पत्तिरिति स्यात्कस्यचिन्मतिः । तथा विकारेभ्य एवाकाशादिभ्य उत्तरेषां विकाराणामुत्पत्तिमुपश्रुत्याका
शस्यापि विकारादेव ब्रह्मण उत्पत्तिरिति कश्चिन्मन्येत तामाशंकामपनेतुमिदं सूत्रमसंभवस्त्विति । न तु खलु ब्रह्मणः सदा
त्मकस्य कुतश्चिदन्यतः संभव उत्पत्तिराशंकयितव्या । कस्मादनुपपत्तेः । सन्मात्रं हि ब्रह्म न तस्य सन्मात्रादेवोत्पत्तिः
संभवत्यसत्यतिशये प्रकृतिविकारभावानुपपत्तेः नापि सद्विशेषाद्दृष्टविपर्ययात् । सामान्याद्धि विशेषा उत्पद्यमाना दृ
श्यन्ते मृदो घटादयो न तु विशेषेभ्यः सामान्यं नाप्यसतो निरात्मकत्वात् कथमसतः सज्जायेतेति चाक्षेपश्रवणात् । स का

शा॰भा॰

रकां कारणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिप इति च ब्रह्मणो जनयितारं वारयति। वियत्पवनयोः पुनरुत्प
पत्तिर्दर्शिता। न त्वत्र ब्रह्मणः सास्तीति वैषम्यं। न च विकारेभ्यो विकारान्तरोत्पत्तिदर्शनात् ब्रह्मणोऽपि विकारान्तरत्वं भवितुम
र्हति। मूलप्रकृत्यनभ्युपगमेनानवस्थाप्रसंगात्। या मूलप्रकृतिरभ्युपगम्यते तदेव नो ब्रह्मेत्यविरोधः॥९॥ तेजोऽतस्तथा
ह्याह॥१०॥ छान्दोग्ये सन्मूलत्वं तेजसः श्रावितं तैत्तिरीयके वायुमूलत्वं। तत्र तेजोयोनिं प्रति विप्रतिपत्तौ सत्यां प्राप्तं ताव
द्ब्रह्मयोनिकं तेज इति। कुतः। सदेवेत्युपक्रम्य तत्तेजोऽसृजतेत्युपदेशात्। सर्वविज्ञानप्रतिज्ञायाश्च ब्रह्मप्रभवत्वे सर्व
स्य संभवात्। तज्जलानिति चाविशेषश्रुतेः। तस्माज्जायते प्राण इति चोपक्रम्य श्रुत्यन्तरे सर्वस्याविशेषेण ब्रह्मजत्वो
पदेशात्। तैत्तिरीयके च स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किंचेत्यविशेषश्रवणात्। तस्माद्वायोरग्निरिति क्रमोपदेशो
द्रष्टव्यो वायोरनन्तरमग्निः संभूत इत्येवं प्राप्ते उच्यते। तेजोऽतो मातरिश्वनो जायत इति। कस्मात्। तथा ह्याह वायो राम॰
रग्निरिति। अव्यवहिते हि तेजसो ब्रह्मजत्वे वायोरग्निरितीयं पंचमीश्रुतिः कदर्थिता स्यात्। ननु क्रमार्थ एषो भवि
ष्यतीति चेत्। नेति ब्रूमः। तस्माद्वा एतस्मादात्मन आकाशः संभूत इति पुरस्तात्संभवत्यपादानस्यात्मनः पंचमीनिर्दे

शाक्तस्यैव च संभवतेरिहाधिकारात् तापरस्मात् पिण्डविकारे ऽपि चास्यो सर्वपदसपादाने पंचमी दर्शनाद्वा यो रयि
रिसपादानपंचमेवेषितिगमनो अपि च वायोरूर्ध्वमग्निः संभवतीति कस्तत्पपदार्थयोगः क्रमस्य कारकार्थयो गो वायो
रग्निः संभवतीति तस्मादेवास्य तेजो वायोरिति ऌं ते जसो गमपतिा अन्वितराणि पिण्डिति तेजसो ब्रह्मयोनि त्वंगमपेतत्तेजोऽस्य ज
नेतिा तत्तस्माः परं पर्यन्त त्वेप्पविरोधात्तापदा पि स्याकांशं वा पंचस्य भूताप्रभावायन्नं वह्नेः तेजोऽस्य जनेतिक स्तेतोऽतदापि ब्र
ह्म जलं तेजसो न विरुध्यते तापप्यातस्मा ऽथ तंतस्माद्धितस्मा अभिसेसादि दर्शयति च ब्रह्मणो विकारात्मनाव संस्थानं त
दात्मानं स्वयमकुरुतेति तथा चेश्वरस्मरणां भवति बुद्धिर्ज्ञानम संमोहः क्षमा धृत क्रमस्य भवं ति भावा भूतानां मत्त एव पृथग्
विधा इति पयपि तद्ध्यादयः स कारणो ऽग्नि प्रलयसंभवंतो दृश्यंते तथापि सर्वस्य भावजातस्य साक्षात्तन्नात्मा वेश्वरवंश्य
त्वात् एतेना क्रमस्य श्रिवादि मः श्रुतपो व्याख्याता स्तासाम सर्वथोपपन्नेः क्रमवृत्तस्य शिवादिनीनां त्वनुपपत्तेः प्र
तिज्ञापि सृष्टिरूप त्वमात्त्रमपेक्षतेनान्यव हितजन्मत्व मिति विरोधः १५ आपः १११ अतस्तथा ह्याह तस्मिन् वर्तते आपो
तस्तेजसो जायंते कस्मात्तथा ह्याह तदपो ऽसृजतेति अग्नेरापइति चा संति वचनेनो ऽपि संशयस्ते जसे सुसृष्टिं व्याख्या

२

शा.भा. पदृषिव्याव्याख्यासन्नपांमतरियमिमापदृतिसत्त्रपांबभूव॥ ६ दृष्टिव्याधिकाररूपशब्दांतरेभ्यः॥ १२॥ ता आप ऐक्षंत
8 ब— ःसामप्रजायेमहीति ता अन्नमसृजंतेति श्रूयते। तत्र संशयः किमनेन अन्नशब्देन व्रीहियवाद्यभ्यवहार्यं वीरुदन्ना
युच्यते॥ किं वा पृथिवीति। तत्र प्राप्तं तावद्व्रीहियवाद्योदनादि वा परिग्रहीतव्यमिति। तत्र ह्यन्नशब्दः प्रसिद्धो लोके।
वाक्यशेषोऽप्येतमर्थमुपोद्बलयति तस्माद्यत्र क्वचन वर्षति तदेव भूयिष्ठमन्नं भवतीति। व्रीहियवाद्येव हि सति वर्ष
णे बहु भवति न पृथिवीति। एवं प्राप्ते ब्रूमः। पृथिव्येवेयमन्नशब्देनाद्भ्यो जायमाना विवक्ष्यत इति। कस्मात्। अधिकार
तद्रूपाच्छब्दांतरेभ्यः। अधिकारस्तावत् तत्तेजोऽसृजत तदपोऽसृजतेति तदापोऽसृजतेति च महाभूतविषयो वर्तते।
तत्र क्रमप्राप्तां पृथिवीं महाभूतं विलंघ्य नाकस्माद्व्रीह्यादिपरिग्रहो न्याय्यः। तथा रूपमपि वाक्यशेषे पृथिव्यनुगुणं दृश्य
ते। यत्कृष्णं तदन्नस्येति। न ह्योदनादेरभ्यवहार्यस्य कृष्णत्वनियमोऽस्ति नापि व्रीह्यादीनाम्। ननु पृथिव्या अपि नैव कृ राम०
ष्णत्वनियमोऽस्ति। पयःपांडुराङ्गाररोहितस्य च क्षेत्रस्य दर्शनात्। नायं दोषो बाहुल्यापेक्षत्वात्। भूयिष्ठं हि पृथि
व्याः कृष्णं रूपं न तथा श्वेतरोहिते। पौराणिका अपि पृथिवीच्छायां शर्वरीमुपदिशंति। सा च कृष्णाभासेत्यतः कृष्णं रू

पंथ्यिव्या इति लिख्यते। शब्दान्तरमपि च समानाधिकारमद्भ्यः पृथिवीति भवति। तद्यदपां शर आसीत्तत्समहन्यत सा पृथि
व्यभवदिति च। पृथिव्यास्तु व्रीह्यादेरुत्पत्तिं दर्शयति पृथिव्या ओषधय ओषधिभ्योऽन्नमिति च। एवमधिकारादिषु पृथिव्याः
प्रतिपादकेषु सत्सु कुतो व्रीह्यादिप्रतिपत्तिः। प्रसिद्धिरप्यधिकारादिभिरेव बाध्यते। वाक्यशेषोऽपि पार्थिवत्वादन्नाद्यस्य तद्
द्वारेण पृथिव्या एवाम्भःप्रभवत्वं सूचयतीति द्रष्टव्यं। तस्मात्पृथिवीयमन्नशब्देति। तदभिध्यानादेव तु तल्लिङ्गात्सः। १३।
किमिमानि वियदादीनि भूतानि स्वयमेव स्वविकारान् सृजन्त्याहोस्वित्परमेश्वर एव तेन तेनात्मनावतिष्ठमानोऽभिध्या
यंस्तं तं विकारं सृजतीति सन्देहे सति। प्राप्तं तावत्स्वयमेव सृजन्तीति। कुतः। आकाशाद्वायुर्वायोरग्निरित्यादि स्वातन्त्र्यश्र
वणात्। नन्वचेतनानां स्वतन्त्राणां प्रवृत्तिः प्रतिषिद्धा। नैष दोषः। तत्तेज ऐक्षत ता आप ऐक्षन्तेति च भूतानामपि चेतनत्वश्र
वणादित्येवं प्राप्तेऽभिधीयते। स एव परमेश्वरस्तेन तेनात्मनावतिष्ठमानोऽभिध्यायंस्तं तं विकारं सृजतीति। कुतः। तदभि
ध्यानात्। तथा हि शास्त्रं यः पृथिव्यां तिष्ठन्यः पृथिवीमन्तरो यमयतीत्येवंजातीयकं साध्यक्षाणामेव भूतानां प्रवृत्तिं दर्शयति। त
था सोऽकामयत बहु स्यां प्रजायेयेति प्रस्तुत्य सच्च त्यच्चाभवत्तदात्मानं स्वयमकुरुतेति च तस्यैव सर्वात्मभावं दर्शयति। प

शा॰ भा॰ त्वोस्मरणं अवरणम प्रेज सोस्तस्य रमेस्मरा वेष्णवधारे वृद्द्रं स्वयं नाम्यो तोस्ति दृष्टेतौ। स्मित्रंतरस्र तिषेधात् प्रकृत त्वाव्वसतर्द स्मि
9 तु स्तं दैस्पत वहुस्सां प्रेजा पेपेत्यत्र॥ ८॥ विपर्ययेण तु क्रमो तउपपद्यते च॥ १४॥ भूतानामुत्पत्तिक्रमस्मिं तितो पेदानीमप्ययक्रमं स्मि
स्पते किमनियतेन क्रमेणाप्यय उतोत्पत्तिक्रमेणाप्यवात दृप्रतेनेति। अप्योपि चोत्पत्तिस्थितिप्रलयाभूतानां व्रत्या पत्ताः अ
यंते यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीति तत्रानियमो विशेषादिति प्राप्तं। अत्र पयो
स्पत्तेः क्रमस्सत्तु त्वात्प्रलयस्यापि क्रमाकांक्षिणः स एव क्रमः स्यादित्येवं प्राप्ते ततो ब्रूमः विपर्ययेण तु प्रलयक्रमो तउत्पत्ति
क्रमाद्विहर्तुमर्हतीति तथाहि लोके दृश्यते येन क्रमेण सोपानमारूढस्ततो विपरीतेन क्रमेणावरोहतीति। अपि च दृश्य
ते मृदो जातं घटोघप्पपकाले मृद्भावमप्येति। अभ्यस्तु जातं हिमकरकाद्यब्भावमप्येतीति। अतश्चोपपद्यत एवैतद्यत्पृथि
व्यद्भ्यो जाता सती स्थितिकालव्यतिक्रांतावपोपीयादापश्चतेजसो जाताः सत्यस्तेजोपीयुः एवं क्रमेण सूक्ष्मं सूक्ष्मतरं चानं
तरमनंतरं कारणमपीत्य सर्वकारणजातं परमकारणं परमसूक्ष्मं व्रत्याप्येतीति वेदितव्यं। नहि स्वकारणव्यतिक्रमेण राम॰
कारणकारणोप्यपयो भाष्यः। स्मृतावप्युत्पत्तिक्रमविपर्ययेणैवाप्ययक्रमस्तत्र तत्र दर्शितो जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रली

पते। ज्योतिष्यापः प्रलीयंते ज्योतिर्वायौ प्रलीयत इत्येवमादौ उत्पत्तिक्रमस्तु सृष्टावेव श्रुतत्वान्नाप्यये भवितुमर्हति न चा
सावप्ययोपयुक्तः अप्ययेना क्रोत्पत्तेः। न हि कार्ये ध्रियमाणे कारणस्याप्ययोपपत्तेः कारणाप्यये कार्यस्यावस्थानानुपपत्तेः।
कार्याप्यये तु कारणस्यावस्थानं युक्तं मृदादिष्वेवं दृष्टत्वात्।१४। अंतरा विज्ञानमनसी क्रमेण तल्लिंगादिति चेन्ना
विशेषात्।१५। भूतानामुत्पत्तिप्रलयावनुलोमप्रतिलोमक्रमाभ्यां भवत इत्युक्तं। आत्मादिरुत्पत्तिः प्रलयश्चात्मांत इत्यप्यु
क्तं। सेन्द्रियस्य तु मनसो बुद्धेश्च सद्भावः प्रसिद्धः श्रुतिस्मृत्योः बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च। इंद्रियाणि हया
नाहुरित्यादिलिंगेभ्यस्तयोरपि कस्मिंश्चिदंतराले क्रमेणोत्पत्तिप्रलयावुपसंग्राह्यौ। सर्वस्य वस्तुजातस्य ब्रह्मजत्वा
भ्युपगमात् अपि चाथर्वणे उत्पत्तिप्रकरणे भूतानामात्मनश्चांतराले करणान्यनुक्रम्यंते। एतस्माज्जायते प्राणो मनः
सर्वेंद्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी इति तस्मात्पूर्वोक्तोत्पत्तिप्रलयक्रमभंगप्रसंगो भूतानामि
ति चेत्। न। अविशेषात्। यदि तावद्भौतिकानि करणानि ततो भूतोत्पत्तिप्रलयाभ्यामेवैषामुत्पत्तिप्रलयौ भवत इति नैत
योः क्रमांतरं मृग्यं। भवति च भौतिकत्वे लिंगं करणानां। अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागित्येवं

ब्र॰भा॰ जातीयकं।व्यपदेशोपि क्वचिद्भूतानां करणानां च ब्राह्मणपरिव्राजकन्यायेन नेतव्यः। अथवा भौतिकानि करणानि त
प्याप्तिनमुतोत्पत्तिक्रमः करणे लिङ्गिष्यते। प्रथमकरणानामुत्पत्ते चरमं भूतानि प्रथमं वा भूतानि तत्पूर्वं ते चरमं वा करणा
नीति। आथर्वणे तु समाम्नायक्रममात्रं करणानां भूतानां च न तत्रोत्पत्तिक्रम उच्यते तथान्यत्रापि पृथगेव भूतक्रमा
त्करणक्रम आम्नायते प्रजापतिर्वा इदमग्र आसीत्स आत्मानमैक्षत स मनोऽसृजत तन्मन एवासीत्तदात्मानमैवै
क्षत तद्वाचमसृजतेत्यादिना तस्मान्नास्ति श्रौतोत्पत्तिक्रमस्य भङ्गः।१५।चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भा
वभावित्वात्।१६।स्तो जीवस्याप्युत्पत्तिप्रलयौ जातो देवदत्तो मृतो देवदत्त इत्येवंजातीयकाल्लौकिकाद्व्यपदेशाज्जा
तकर्मादिसंस्कारविधानाच्चेति स्यात्कस्यचिद्भ्रान्तिः तामपनुदामः।न जीवस्योत्पत्तिप्रलयौ स्तः।शास्त्रफलसम्बन्धोपप
त्तेः।शरीरानुविनाशिनि हि जीवे शरीरान्तरगतेष्टानिष्टप्राप्तिपरिहारार्थौ विधिप्रतिषेधावनर्थकौ स्यातां श्रूयते च
जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति।ननु लौकिको जन्ममरणव्यपदेशो जीवस्य दर्शितः।सत्यं द एम॰
र्शितो भाक्तस्त्वेष जीवस्य जन्ममरणव्यपदेशः।किमाश्रयः पुनरयं मुख्यो यदपेक्षया भाक्त इत्युच्यते चराचरव्य

पाश्रयः स्थावरजंगमशरीरविषयौ जन्ममरणशब्दौ स्थावरजङ्गमानि हि भूतानि जायंते च म्रियंते चात्मतस्तद्विषयौ जन्म
मरणशब्दौ मुख्यौ संतौ तत्स्थे जीवात्मन्युपचर्येते तद्भावभावित्वाच्छरीरप्रादुर्भावतिरोभावयोर्हि सतोर्जन्ममरणशब्दौ
भवतो नासतोर्न हि शरीरसंबंधादन्यत्र जीवो जातो मृतो वा केनचिदुपलक्ष्यते स वा अयं पुरुषो जायमानः शरीरमभिसंबध्य
मान उत्क्रामन्म्रियमाण इति च शरीरसंयोगवियोगनिमित्तावेव जन्ममरणशब्दौ दर्शयति जातकर्मादिविधानमपि दे
हप्रादुर्भावापेक्षमेव द्रष्टव्यमभावाज्जीवप्रादुर्भावस्य जीवस्य परस्मादात्मन उत्पत्तिर्वियदादीनामिवास्ति नास्ति वेत्येतदु
त्तरेण सूत्रेण वक्ष्यति। देहाश्रयौ तावज्जीवस्य स्थूलावुत्पत्तिप्रलयौ न स्त इत्यनेन सूत्रेणावोचत।१६।नात्माश्रुतेर्नित्यत्वा
च्च ताभ्यः।१७।अस्त्यात्मा जीवाख्यः शरीरेन्द्रियपंजराध्यक्षः कर्मफलसंबंधी स किं व्योमादिवदुत्पद्यते ब्रह्मण आहोस्विद्ब्र
ह्मवदेव नोत्पद्यत इति श्रुतिविप्रतिपत्तेर्विषयः। कासुचिच्छ्रुतिष्वग्निविस्फुलिंगादिनिदर्शनैर्जीवात्मनः परस्माद्ब्रह्मण
उत्पत्तिराम्नायते कासुचित्त्वविकृतस्यैव परस्य ब्रह्मणः कार्यप्रवेशेन जीवभावो विज्ञायते न चोत्पत्तिराम्नायत इ
ति तत्र प्राप्तं तावदुत्पद्यते जीव इति। कुतः प्रतिज्ञानुपरोधादेव एकस्मिन्विदिते सर्वं विदितमितीयं प्रतिज्ञा सर्वस्य वस्तु

शा॰भा॰ जातस्य ब्रह्मप्रभवत्वे सति नोपपद्येतान्तरेण जीवसृष्टिं प्रतिज्ञेयम्। न चाविकृतः परमात्मैव जीव इति शक्यते विज्ञातुं
लक्षणभेदात्। अपहतपाप्मत्वादिधर्मको हि परमात्मा तद्विपरीतो जीवः। विभागाच्चास्य विकारत्वसिद्धिः। यावान् ह्याकाशादिः
प्रविभक्तः स सर्वो विकारः। तस्य चाकाशादेरुत्पत्तिः समधिगता। जीवात्मापि पुण्यापुण्यकर्मा सुखदुःखयुक् प्रतिशरीरं प्र
विभक्त इति तस्यापि प्रपंचोत्पत्तिसमये उत्पत्तिर्भवितुमर्हति। अपि च यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंत्येवमेवास्मादात्मनः
सर्वे प्राणा इति प्राणादेर्भोग्यजातस्य सृष्टिं शिष्ट्वा सर्व एत आत्मानो व्युच्चरंतीति भोक्तॄणामात्मनां पृथक् सृष्टिं शास्ति।
यथा सुदीप्तात्पावकाद्विस्फुलिंगाः सहस्रशः प्रभवंते सरूपाः तथाक्षराद्विविधाः सोम्य भावाः प्रजायंते तत्र चैवापियंती
ति च जीवात्मनामुत्पत्तिप्रलयावुच्येते सरूपवचनात्। जीवात्मानो हि परमात्मना सरूपा भवंति चैतन्ययोगात्। न च क्वचि
दश्रवणमन्यत्र श्रुतं वारयितुमर्हति श्रुत्यंतरगतस्याप्यविरुद्धस्याधिकस्यार्थस्य सर्वत्रोपसंहर्तव्यत्वात्। प्रवेशश्रुति राम॰
रप्येवं सति विकारभावापत्त्यैव व्याख्याता तदात्मानं स्वयमकुरुतेत्यादिवत् तस्मादुत्पद्यते जीव इत्येवं प्राप्ते ब्रूमः। नात्मा
जीव उत्पद्यत इति। कस्मात् अश्रुतेः। न ह्यस्योत्पत्तिप्रकरणे श्रवणमस्ति भूयःसु प्रदेशेषु। ननु क्वचिदश्रवणमन्यत्र श्रुतं न व

वारयतीत्युक्तं। स समुत्क्रमत्यशरीरे व स्वस्थत्वं भवतीति वदाम:। कस्मान्निमित्ताच्चेतनाम:। चशब्दादुत्क्रान्त्यादिभ्य:। निमित्तं च
समुत्क्रान्तिर्भोगवृत्त्यमुत्र प्राजत्वमेव विकारित्वमविकृतस्यैव ब्रह्मणो जीवात्मनावस्थानं ब्रह्मात्मना चेति न चैवं रूपस्यो
त्पत्तिरूपपद्यते। काऽस्ता: श्रुतयो न जीवो म्रियते सर्वा एष महानज आत्मा जरोऽमरोऽमृतोऽभयो ब्रह्म न जायते म्रियते वा विपश्चि
दजो नित्य: शाश्वतोऽयं पुराणो हतस्त। सृष्ट्वा तदेवानुप्राविशत्। अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति स एष इ
ह प्रविष्ट आ नखाग्रेभ्य: तत्त्वमसि अहं ब्रह्मास्मि अयमात्मा ब्रह्म सर्वानुभूरित्येवमाद्या नित्यत्वादिकादिभ्य: श्रुतयो जीवस्यात्
पत्तिं प्रतिषेधन्ति। ननु प्रविभक्तत्वाद्विकारो विकारत्वाच्चोत्पद्यत इत्युक्तम्। अत्रोच्यते। नास्य प्रविभाग: स्वतोऽस्ति। एको देव: सर्व
भूतेषु गूढ: सर्वव्यापी सर्वभूतान्तरात्मेति श्रुते:। बुद्ध्याद्युपाधिनिमित्तं त्वस्य प्रविभागप्रतिभानमाकाशस्येव घटादिसंब
न्धनिमित्तं। तथा च शास्त्रं स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमय: प्राणमयश्चक्षुर्मय: श्रोत्रमय इत्येवमादि ब्रह्म
ण एवाविकृतस्य सतोऽनेकबुद्ध्यादिमयत्वं दर्शयति। तन्मयत्वं चास्य तद्विविक्तस्वरूपानभिव्यक्त्या तदुपर
क्तस्वरूपत्वं स्त्रीमयो जाल्म इत्यादिवद्द्रष्टव्यं। यदपि क्वचिदस्योत्पत्तिप्रलयश्रवणं तदप्यत एवोपाधिसंबन्धादिति

12

मुपाध्युत्पत्तावस्योत्पत्तिः स्यात्प्रलये च प्रलय इति। तथा च दर्शयति प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्य
ति। न प्रेत्य संज्ञास्तीति। तथोपाधिप्रलय एवायं नात्मप्रविलय इत्येतदप्यत्रैव मा भगवानमूमोहांतमापीपदन्न वा अहमिमं नानामि
न प्रेत्य संज्ञास्तीति प्रश्नपूर्वकं प्रतिपादयति न वा अरेऽहं मोहं ब्रवीम्यविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मा मात्रासंसर्गस्त्वस्य
भवतीति प्रतिपादनात्परोधोप्यविकृतस्यैव ब्रह्मणो जीवभावाभ्युपगमात्रस्य भेदोप्यनपोह्यपाधिनिमित्त एवातः ध्रुवि
मोस्यापैव क्रहो इति च प्रकृतस्यैव विज्ञानमयस्यात्मनः सर्वसंसारधर्मप्रत्याख्यानेन परमात्मभावप्रतिपादनात् तस्मा
न्नैवात्मोत्पद्यते प्रलीयते वेति। १७। ज्ञोत एव। १८। स किं काणभुजानामिवागंतुकचैतन्यः स्वतोचेतन आत्माहोस्वित्सांख्याना
मिव नित्यचैतन्यस्वरूप एवेति वादिविप्रतिपत्तेः संशयः। किं तावत्प्राप्तं आगंतुकमात्मनश्चैतन्यमात्ममनःसंयोगजमग्नि
घटसंयोगजरोहितादिगुणवदिति प्राप्तं। नित्यचैतन्यत्वे हि सुप्तमूर्छितग्रहाविष्टानामपि चैतन्यं स्यात्ते पृष्टाः संतो न किं
चिद्वयमचेतयामहीति जल्पंति स्वस्थाश्च चेतयमाना दृश्यंते अतः कादाचित्कचैतन्यत्वादागंतुकचैतन्य आत्मेत्येवं प्रा
प्तेऽभिधीयते ज्ञो नित्यचैतन्योऽयमात्मा। अत एव यस्मादेव नोत्पद्यते परमेव ब्रह्माविकृतमुपाधिसंपर्काज्जीवभावेनावति

एम०

ष्ठतो परस्य हि ब्रह्मणश्चैतन्यस्वरूपत्वमाम्नातं विज्ञानमानन्दं ब्रह्म सत्यं ज्ञानमनन्तं ब्रह्म अनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन
एवेत्यादिश्रुतिषु । न चेद्वं चेत्परं ब्रह्म जीवस्तस्माज्जीवस्यापि नित्यचैतन्यस्वरूपत्वमग्न्यौष्ण्यप्रकाशवदिति गम्यते । विज्ञानमयप्र
क्रियायां च श्रुतयो भवंत्यसुप्तः सुप्तानभिचाकशीति अत्रायं पुरुषः स्वयंज्योतिर्भवति न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यत
इत्येवंरूपाः । अथ यो वेदेदं जिघ्राणीति स आत्मेति च सर्वैः करणद्वारैरिदं वेदेदं वेदेति विज्ञानेनानुसंधानात्तद्रूपत्व
सिद्धिः । नित्यचैतन्यस्वरूपत्वे घ्राणाद्यानर्थक्यमिति चेन्न गन्धादिविषयविशेषपरिच्छेदार्थत्वात् । तथा हि दर्शयति गन्धा
य घ्राणमित्यादि । यत्तु सुप्तादयो न चेतयन्त इति तत्र श्रुत्यैव परिहारोऽभिहितः सुषुप्तं प्रकृत्य यद्वै तन्न पश्यति पश्यन्वै तन्न द्रष्टव्यं न प
श्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येदित्यादिना । एतदुक्तं भव
ति विषयाभावादयमचेतयमानो न त्वचैतन्यादिति यथा वियदाश्रयस्य प्रकाशस्य प्रकाश्याभावादनभिव्यक्तिर्न
स्वरूपाभावात्तद्वद्धैतुकैषिकादितर्कस्तु श्रुतिविरोधे आभासो भवति ॥ तस्मान्नित्यचैतन्यस्वरूप एवात्मेति निश्चिनुमः ।
१८ । उत्क्रान्तिगत्यागतीनां । १९ । इदानीं तु किंपरिमाणो जीव इति चिन्त्यते किमणुपरिमाण उत मध्यमपरिमाण आहोस्वि

महापरिमाण इति। ननु चनात्मोस्य घटते नित्यचैतन्यश्चायमित्युक्तमतश्च पर एवात्मा जीव इत्यापतति परस्य चात्मनोऽनंत
त्वमाम्नातं तत्र कुतो जीवस्य परिमाणचिंतावतार इति। उच्यते। सत्यमेवमेतत्। उत्क्रांतिगत्यागतिश्रवणानि तु जीवस्य प
रिच्छेदं प्रापयंति। स्वशब्देन चास्य क्वचिदणुपरिमाणत्वमाम्नायते तस्यानाकुलत्वोपपादनायायमारंभः तत्र प्राप्तं ता
वदुत्क्रांतिगत्यागतीनां श्रवणादणुर्जीव इति। उत्क्रांतिस्तावत् स यदास्माच्छरीरादुत्क्रामति सहैवैतैः सर्वैरुत्क्रा
मतीति। गतिरपि ये वै के चास्माल्लोकात्प्रयंति चंद्रमसमेव ते सर्वे गच्छंतीति। आगतिरपि तस्माल्लोकात्पुनरेत्यस्मै लो
काय कर्मणे इति। आसामुत्क्रांतिगत्यागतीनां श्रवणात्परिच्छिन्नस्तावज्जीव इति प्राप्नोति। नहि विभोश्चलनमवक
ल्पत इति। सति च परिच्छेदे शरीरपरिमाणत्वस्यार्हतपरीक्षायां निरस्तत्वादणुरात्मेति गम्यते॥ स्वात्मना चोत्तर
योः॥२०॥ उत्क्रांतिः कदाचिदचलतोपि ग्रामस्वाम्यनिवृत्तिवद्देहस्वाम्यनिवृत्त्या कर्मक्षयेणावकल्पेतोत्तरे तु गत्या
गती नाचलतः संभवतः। स्वात्मना हि तयोः संबंधो भवति गमेः कर्तृस्थक्रियात्वात्। अमध्यमपक्षे हृदि निमग्नानां संबो राम॰
(ग)शैत्योपलब्धिर्निदाघसमये च सकलशरीरे परितापोपलब्धिरिति। अत उत्तरं पठति। अविरोधश्चंदनवत्॥२३॥ यथा

हि हरिचंदनविंदुः शरीरैकदेशसंबद्धोऽपि सकलदे(ह)रिमाणस्य चागमागतोऽणुत्व एव संभवतः । सत्योऽप्यागमागतो
रुत्क्रांतिरप्युपपद्यते शरीरादेहादितिप्रतीपत्तेः । न त्वनणुपक्षे प्रसृप्तस्य देहाद्गमागतो स्यात् । देहस्य देहिनां चोत्क्रांतावपादानत्वव
चनात् स्वसुप्तो वाम्ब्रह्मसंपन्नो भोवा शरीरदेशे स्पष्टचित्तस्य एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति शुक्रमादायपु
नरैति स्थानमिति चांतरपि शरीरे शरीरस्यागमागतो भवतस्मादप्यस्याणुत्वसिद्धिरिति । नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारा
त् । अथापि स्यान्नाणुरयमात्मा कस्मादतच्छ्रुतेः अणुत्वविपरीतपरिमाणश्रवणादित्यर्थः । स वा एष महानज आत्मा यो यं विज्ञा
नमयः प्राणेषु आकाशवत्सर्वगतश्च नित्यः सत्यं ज्ञानमनंतं ब्रह्मेत्येवंजातीयकाहि श्रुतिरात्मनोऽणुत्वे प्रतिषिध्येतेति चे
त् । नैष दोषः । कस्मादितराधिकारात् परस्य ह्यात्मनः प्रक्रियायामेताः परिमाणांतरश्रुतयः । परस्यैवात्मनः प्राधान्येन वेदांते
तेषु वेदितव्यत्वेन प्रकृतत्वात् विरजः पर आकाशादित्येवंविधाच्च परस्यैवात्मनस्तत्र तत्र विशेषाधिकारात् । ननु यो यं वि
ज्ञानमयः प्राणेष्विति शारीर एव महत्त्वसंबंधित्वेन प्रतिनिर्दिश्यते । शास्त्रदृष्ट्या त्वेष निर्देशो वामदेववद्द्रष्टव्यः । तस्मात्प्रा
ज्ञविषयत्वात्परिमाणांतरस्य न जीवस्याणुत्वं विरुध्यते । स्वशब्दोन्मानाभ्यां च । इतश्चाणुरात्मा यतः साक्षादेवास्याणुत्ववा

शा: भा: दीश्वरः स्वपतेऽपि सोऽपुरात्माचेतनस्थावेदित्वमोऽयमस्मिन्प्राणः पंचधा संविवेशेति प्राणांसंवं धाम्न जीवत्वापमणुरभिहत
इति गम्यते। तथा तस्मात्मानमपि जीवस्यास्ति मानं गमयति वा बालाग्रशतभागस्य शतधा कल्पितस्य तु भागो जीवः स विज्ञेय इति। आ
14 राग्रमात्रो ह्यपरोऽपि दृष्ट इति चोत्मानांतरं। ननु अणुत्वे सत्येकदेशस्थस्य सकलदेहोपलब्धिर्विरुध्येत। दृश्यते हि जाह्नवी
ह्रदे निमग्नानां सर्वांगशैत्योपलब्धिर्निदाघसमये च सकलशरीरोपतापोपलब्धिरिति। अत उत्तरं पठति। अविरोध
श्चंदनवत्। २३। यथा हि हरिचंदनविंदुः शरीरैकदेशस्थस्सन्वर्त्तेऽपि सकलदेहव्यापिनमाह्लादं करोत्येवमात्मापि दे
हैकदेशस्थः सन्सकलदेहव्यापिनीं ति। अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्हृदि हि। २४। अत्राह यदुक्तम
विरोधश्चंदनवदिति तदयुक्तं दृष्टांतदार्ष्टांतिकयोरतुल्यत्वात्। सिद्धे ह्यात्मनो देहैकदेशस्थत्वे चंदनदृष्टांतो
वहति प्रत्यक्षं तु चंदनस्यावस्थितिवैशेष्यमेकदेशस्थत्वं सकलदेहाह्लादनं च। आत्मनः पुनः सकलदेहोपलब्धि राम०
मात्रं प्रत्यक्षं नैकदेशवर्त्तित्वम्। अनुमेयं तदिति यदुच्येत। न चात्रानुमानं संभवति किमात्मनः सकलशरीरगतावे
दना त्वगिंद्रियस्येव सकलदेहव्यापिनः सतः किं वा विभोर्नभस इव आहोस्विच्चंदनविंदोरिवाणोरेकदेशस्थस्येति सं

व्यापारनिवृत्तिरिति। अत्रोच्यते नायं दोषः। कस्मात् अभ्युपगमात्। अभ्युपगम्यते ह्यात्मनोपि चंदनस्येव देहैकदेशवर्त्तित्वम
वस्थितिवैशेष्यं। कथमित्युच्यते। हृदि ह्येष आत्मा पठ्यते वेदांतेषु हृदि ह्येष आत्मा स वा एष आत्मा हृदि कतम आत्मे
ति योयं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिरित्याद्युपदेशेभ्यः तस्माद्दृष्टांतदार्ष्टांतिकयोरवैषम्यादयुक्तमेवैत
दविरोधश्चंदनवदिति। गुणाद्वा लोकवत्।२५। चैतन्यगुणव्याप्तेर्वा अणोरपि सतो जीवस्य सकलदेहव्यापि कार्यं न विरु
ध्यते। यथा लोके मणिप्रदीपप्रभृतीनामपवरकैकदेशवर्त्तिनामपि प्रभापवरकदेशव्यापिनी सती कृत्स्नेपवरके का
र्यं करोति तद्वत्। स्यात्कदाचिच्चंदनस्य सावयवत्वात्सूक्ष्मावयवविप्रसर्पणेनापि सकलेदेहे आल्हादयितृत्वं न त्व
णोर्जीवस्यावयवाः संति येनायं सकलदेहं विप्रसर्पेदित्याशंक्य गुणाद्वा लोकवदित्युक्तं। कथं पुनर्गुणो गुणिव्यतिरे
केणान्यत्र वर्त्तेत। न हि पटस्य शुक्लो गुणः पटव्यतिरेकेणान्यत्र वर्त्तमानो दृश्यते। प्रदीपप्रभावद्भवेदिति चेत्। न
तस्या अपि द्रव्यत्वाभ्युपगमात्। निबिडावयवं हि तेजोद्रव्यं प्रदीपः प्रविरलावयवं तु तेजोद्रव्यमेव प्रभेति। अत उत्त
रं पठति। व्यतिरेको गंधवत्।२६। यथा गुणस्यापि सतो गंधस्य गंधवद्द्रव्यव्यतिरेकेण वृत्तिर्भवत्यप्राप्तेष्वपि कुसुमा

स्या॰भा॰ दिषु गंधवत्त कुयुगंधवत् कुसुमादिगंधोपलब्धेरेवमरागोरपि सतो जीवस्य चैतन्यगुणव्यतिरेकोऽमति ष्यत्सत अमात्रे कांति
कन्येत द्रुणतोद्रूपादिवद्दः अथ विश्लेषात्तु पपतिरितिगुणसेवस्य तो गंधस्याश्रयविश्लेषदर्शनोऽद्रंधस्यापि स्तदेवाश्रयेण
विश्लेषइतिचेत्। नयस्मान्मलद्रव्यादिश्लेषस्तस्याश्रयप्रसंगाद्दृश्योपमाणमपितत्रद्रवोवस्यातोगम्यते। इतरथा
नद्रव्यवस्थैर्येऽद्रव्यादिमिन्नौ येन। स्यादेतत् धाश्रयाणां विश्लिष्टो नाम स्यात्स्वात्तत्नपि विश्लेषो नोपलभ्यते। स्वस्मा
त्ति गंधपरमाणवः सर्वतो विप्रसृता गंधबुद्धिमुत्पादयंति नासिकापुटमनुप्रविशंत इतिचेत्। नातीन्द्रियत्वात्परमा
णूनां स्फुटो गंधोपलब्धेश्च नागकेसरादिषु न च लोके प्रतीतिर्गंधवद्द्रव्यमाघ्रातमिति गंध एवाघ्रात इति तु लौकि
काः प्रतिपंति रूपादिष्वाश्रयव्यतिरेकानुपलब्धेर्गंधस्याप्युपलब्ध्याश्रयव्यतिरेक इति चेत्। न प्रत्यक्षत्वादनुमा
नाप्रवृत्तेः। तस्माद्यथादृष्टं लोके दृष्टं तत्तथैवावगंतव्यं निरूपकैर्नान्यथा नहि रसो गुणो जिह्वयोपलभ्यते रसतो रूपा
द्योपि गुणा जिह्वयैवोपलभ्येरन्निति निर्णयं तुमशक्यं तेन। तथा चादर्शोपपत्तिः।४७। दृष्टंखायातेन सममुणु परिमाणं खे चामनो वि
धापंत स्फेवालोमध्यश्चानखाग्रेमध्य इति चेत् नेन गुणेन घ्रमत्साम्याः वापि त्वंदर्शोपपत्तिः। एष्यग परदेशात।४८। प्रत्यक्षपा

एम

शरीरंसमारुरुक्षतीतिचात्मप्रत्ययः।कर्त्तृत्वांशाभावेनह्यपरपदेशाद्भूतोनैवास्यशरीरव्यापित्वागमस्तेनतद्देशांप्राणानांवि
ज्ञानेनविज्ञानेनादायेतिचकर्तुः।शरीराद्युपाधिविज्ञानस्योपदेशात्तमेवाभिप्रायप्रयोहृत्स्वपतितस्माद्दरुणोराज्ञेसेवंप्रा
प्ते ब्रूमः॥तद्गुणसारत्वात्तुतद्व्यपदेशःप्राज्ञवत्॥२९॥तुशब्दःपक्षंव्यावर्त्तयतिनैतदस्त्यणुरात्मेतिउत्पत्त्यश्रवणाद्धिपर
स्यैवब्रह्मणःप्रवेशश्रवणात्तादात्म्योपदेशाच्चपरमेवब्रह्मजीवइत्युक्तं।परमेवचेद्ब्रह्मजीवस्तस्माद्यावत्परंब्रह्मता
वानेवजीवोभवितुमर्हति।परस्यचब्रह्मणोविभुत्वमाम्नातंतस्माद्विभुर्जीवः।तथाचसवाएषमहानजआत्मायोयं
विज्ञानमयःप्राणेष्वित्येवंजातीयकाजीवविषयाविभुत्ववादाःश्रौताःस्मार्ताश्चसमर्थिताभवंति।नचाणोर्जीवस्य
सकलशरीरगतावेदनोपपद्यते।त्वक्संबंधात्स्यादितिचेत्।नकंटकतोदनेपिसकलशरीरगतैववेदनाप्रसज्ये
त।त्वक्कंटकयोर्हिसंयोगःकृत्स्नायांत्वचिवर्त्ततेत्वक्चकृत्स्नशरीरव्यापिनीति।पादतलएवकंटकेनुन्नेवे
दनांप्रतिलभंते।नचाणोर्गुणव्याप्तिरुपपद्यतेगुणस्यगुणिदेशत्वात्।गुणत्वमेवहिगुणिनमनाश्रित्यगुणस्यही
येत।प्रदीपप्रभायाश्चद्रव्यांतरत्वंव्याख्यातं।गंधोपिगुणत्वाभ्युपगमात्साश्रयएवहिसंचरितुमर्हत्यन्यथागुणत्वहा

शा. भा.

16

नित्रसंगात्। तथा चोक्तं द्वेयापनेनोपलभ्याणुवेरुं यं केचिद्रूपरतेपुला:श्रयि व्यामेवतं विघाद्यो वा पंचसंस्थितमिति। यदी
दं चैतत्संजीवस्य समस्तं शरीरं व्याप्नुवान्नाणुर्न विभुः स्यात्। तच्चेतन्नसर्वमेव तत्परस्परूपमयेरि वोस्य प्रकाशो नात्र गुणगुणि विभागो
विद्यत इति। शरीरपरिमाणत्वं च प्रत्याख्यातं। परिशेषाद्विभुर्जीव इति। कथं तर्ह्यणुत्वादिव्यपदेश इत्यत आह तद्गुणसार
त्वात्तद्व्यपदेश इति। तस्या बुद्धेर्गुणास्तद्गुणा इच्छा द्वेषः सुखं दुःखमित्येवमादयस्तद्गुणाः सारः प्रधानं यस्यात्मनः संसारि
त्वे सम्भवति स तद्गुणसारस्तस्य भावस्तद्गुणसारत्वं। न हि बुद्धेर्गुणैर्विना केवलस्यात्मनः संसारित्वमस्ति। बुद्ध्युपाधिधर्माध्यासनि
मित्तं हि कर्तृत्वभोक्तृत्वादिलक्षणं संसारित्वमकर्तुरभोक्तुश्चासंसारिणो नित्यमुक्तस्य सत आत्मनः। तस्मात्तद्गुणसारत्वा
द्बुद्धिपरिमाणेनास्य परिमाणव्यपदेशः तदुत्क्रान्त्यादिभिश्चास्योत्क्रान्त्यादिव्यपदेशो न स्वतः। तथा च वालाग्रशतभाग
स्य शतधा कल्पितस्य तु भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते इत्यणुत्वं जीवस्योक्त्वा तस्यैव पुनरानन्त्यमाह। तच्चैवमे
व समंजसं स्याद्यद्यौपचारिकमणुत्वं जीवस्य भवेत्पारमार्थिकं चानन्त्यं। न ह्युभयं मुख्यमवकल्पेत न चानन्त्यमौपचारिक
मिति शक्यं विज्ञातुं सर्वोपनिषत्सु ब्रह्मात्मभावस्य प्रतिपिपादयिषितत्वात्। तथेतरस्मिन्नप्युन्माने बुद्धेर्गुणेनात्मगुणेन

राम०

चैवाराग्रमात्रो ह्यपरोपि दृष्ट इति बुद्धिगुणसंबंधेनैवाराग्रमात्रत्वं प्राप्नोति न तु स्वेनैवात्मना एषोणुरात्मा चेतसा वेदितव्य इत्यत्रा
पि न जीवस्याणुपरिमाणत्वं शिष्यते परस्यैवात्मनश्चक्षुराद्यनवग्राह्यत्वेन ज्ञानप्रसादगम्यत्वेन च प्रकृतत्वात् जीवस्यापि च मुख्या
णुपरिमाणत्वानुपपत्तेः। तस्माद्दुर्ज्ञानत्वाभिप्रायमिदमणुत्ववचनमुपाध्यभिप्रायं वा द्रष्टव्यं। तथा प्रज्ञया शरीरं समारुह्येत्ये
वंजातीयकेष्वपि भेदोपदेशेषु बुद्ध्यैवोपाधिभूतया जीवः शरीरं समारुह्येत्येवं योजयितव्यं। व्यपदेशमात्रं वा शिलापुत्र
कस्य शरीरमित्यादिवत् न ह्यत्र गुणगुणिविभागोपि विद्यत इत्युक्तं। हृदयायतनत्ववचनमपि बुद्धेरेव तदायतनत्वात् तथो
त्क्रांत्यादीनामप्युपाध्यायत्ततां दर्शयति कस्मिन्न्वहमुत्क्रांत उत्क्रांतो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठिते प्रति
ष्ठास्यामीति स प्राणमसृजतेति उत्क्रांत्यभावे हि गमनागमनयोरप्यभावो विज्ञायते। न ह्यनपसृप्तस्य देहाद्गत्यागती स्यातामे
वमुपाधिगुणसारत्वाज्जीवस्याणुत्वादिव्यपदेशः प्राज्ञवत्। यथा प्राज्ञस्य परमात्मनः सगुणेषूपासनेषूपाधिगुण
सारत्वादणीयस्त्वादिव्यपदेशोणीयान्व्रीहेर्वा यवाद्वा मनोमयः प्राणशरीरः सर्वगंधः सर्वरसः सत्यकामः सत्यसं
कल्प इत्येवंप्रकारस्तद्वत्। स्यादेतत् यदि बुद्धिगुणसारत्वादात्मनः संसारित्वं कल्प्येत ततो बुद्ध्यात्मनोर्भिन्नयोः संयोग

शा॰भा॰ वसानमवश्यंभावी स्यात्ततो बुद्धिवियोगे सत्यात्मनो विभक्तस्यानालक्ष्यत्वादसत्त्वमसंसारित्वं वा प्रसज्येत। अत उत्तरं पठति।
यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्॥ ३०॥ नेयमनन्तरनिर्दिष्टदोषप्राप्तिराशंकनीया कस्मात् यावदात्मभावित्वाद्बु
17 द्धिसंयोगस्य। यावदयमात्मा संसारी भवति यावदस्य सम्यग्दर्शनेन संसारित्वं न निवर्त्तते तावदस्य बुद्ध्या संयोगेन शाम्य
ति। यावदेव चायं बुद्ध्युपाधिसंबन्धस्तावदेव जीवस्य जीवत्वं संसारित्वं च परमार्थतस्तु न जीवो नाम बुद्ध्युपाधिकल्पितस्वरूपव्य
तिरेकेणास्ति। न हि नित्यमुक्तस्वरूपात्सर्वज्ञादीश्वरादन्यश्चेतनो धातुर्द्वितीयो वेदान्तार्थनिरूपणायामुपलभ्यते नान्योऽतो
ऽस्ति द्रष्टा श्रोता मन्ता विज्ञाता नान्यदतोऽस्ति द्रष्टृ श्रोतृ मन्तृ विज्ञातृ तत्त्वमसि अहं ब्रह्मास्मीत्यादिश्रुतिशतेभ्यः। कथं पुनरव
गम्यते यावदात्मभावी बुद्धिसंयोग इति तद्दर्शनादित्याह तथा हि शास्त्रं दर्शयति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः
पुरुषः स समानः सन्नुभौ लोकावनुसंचरति ध्यायतीव लेलायतीवेत्यादि। तत्र विज्ञानमय इति बुद्धिमय इत्येतदुक्तं भ
वति। प्रदेशान्तरे विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमय इति विज्ञानमयस्य मनआदिभिः सह पाठाद्बुद्धिम राम॰
यत्वं च तद्गुणसारत्वमेवाभिप्रेयते। यथा लोके स्त्रीमयो देवदत्त इति स्त्रीरागादिप्रधानोऽभिधीयते तद्वत्। स समानः स

लुभौ लोकावनुसंचरतीति लोकांतरगमनेप्यवियोगं तद्बुद्ध्या दर्शयति । केन समानस्तया बुद्ध्येति गम्यते संनिधानात्तथा
च दर्शयति ध्यायतीव लेलायतीवेति । एतदुक्तं भवति । नायं स्वतो ध्यायति नापि चलति ध्यायंत्यां तु बुद्धौ ध्यायतीव चलंत्यां च
चलतीवेति । अपि च मिथ्याज्ञानपुरःसरोयमात्मनो बुद्ध्यादिसंबंधः । न च मिथ्याज्ञानस्य सम्यग्ज्ञानादन्यत्र निवृत्तिरस्तीत
तो यावद्ब्रह्मात्मतानवबोधस्तावदयं बुद्ध्युपाधिसंबंधो न शाम्यति । दर्शयति च वेदः । वेदाहमेतं पुरुषं महांतमादित्यवर्णं त
मसः परस्तात् । तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति । ननु सुषुप्तप्रलययोर्न शक्यते बुद्धिसंबंध आत्मनो
ऽभ्युपगंतुं सता सोम्य तदा संपन्नो भवतीति वचनात् । कृत्स्नविकारप्रलयाभ्युपगमाच्च । तत्कथं यावदात्मभावित्वं बुद्धिसंबं
धस्येति । अत्रोच्यते । पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् । ३१ । यथा लोके पुंस्त्वादीनि बीजात्मना विद्यमानान्येव बाला
दिष्वनुपलभ्यमानानि अविद्यमानवदभिप्रेयमाणानि यौवनादिष्वाविर्भवंति न चाविद्यमानान्युत्पद्यंते । षंढादीनामपि त
दुत्पत्तिप्रसंगात् एवमयमपि बुद्धिसंबंधः शक्त्यात्मना विद्यमान एव सुषुप्तप्रलययोः प्रबोधप्रसवयोराविर्भवति । एवं ह्येतद्यु
ज्यते न ह्याकस्मिकी कस्यचिदुत्पत्तिः संभवति अतिप्रसंगात् । दर्शयति च सुषुप्तादुत्थानमविद्यात्मकबीजसद्भावकारितं

शां॰भा॰ संतिसंपृथगनविदुः सति संपघामहरूविततहव्याघ्रोवाघिंहोवेत्यादिना तस्मात्ति द्रुमेत यावदात्ममावीबुद्धिसंबंधइ
ति। नित्योपलब्ध्यनुपलब्धिप्रसंगोऽन्यतरनियमो वान्यथा तत्त्वात्मन इत्थाषि। तत्रमंतःकरणं मनो बुद्धिर्विज्ञानं
चित्तमिति चानेकधा तत्र तत्राभिलप्यते। क्वचिच्च वृत्तिविभागेन संशयादिवृत्तिकं मन इत्युच्यते। निश्चयादिवृत्तिका बु
द्धिरिति। तच्चैवंभूतमंतःकरणमवश्यमस्तीत्यभ्युपगंतव्यमन्यथा ह्यनभ्युपगम्यमाने तस्मिन्नित्योपलब्ध्यनुपलब्धि
प्रसंगः स्यात्। आत्मेंद्रियविषयाणामुपलब्धिसाधनानां संनिधाने सति नित्यमेवोपलब्धिः प्रसज्येत। अथ सत्स्वपि हेतु
समवधाने फलाभावस्ततो नित्यमेवानुपलब्धिः प्रसज्येत न चैवं दृश्यते। अथवान्यतरस्यात्मन इंद्रियस्य वा शक्ति
प्रतिबंधोऽभ्युपगंतव्यः न चात्मनः शक्तिप्रतिबंधः संभवति नित्यत्वात् नापींद्रियस्य नल्लिंगस्य रवीतरयोः
सरणपोरप्रतिबद्धशक्तिकस्य सतो कस्माच्छक्तिः प्रतिबध्येत तस्माद्यस्यावधानानवधानाभ्यामुपलब्ध्यनुपलब्धी राम०
भवतः तन्मनः। तथा च श्रुतिः अन्यत्रमना अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौषमिति। मनसा ह्येव पश्यति मनसा श्र
णोतीति। कामादयश्चास्य वृत्तय इत्याह। कामः संकल्पो विचिकित्साश्रद्धाश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्स

वं मन एवेति। तस्मादुक्तमेव कृतबुद्धिस्मारत्वान्न व्यपदेशादिति।२९। कर्त्ता शास्त्रार्थवत्त्वात्।३३। तद्गुणसारत्वाधिकारेणैवा
परोपि जीवधर्मः प्रपंच्यते। कर्त्ता चायं जीवः कस्मात् शास्त्रार्थवत्त्वात्। एवं च यजेत जुहुयात् दद्यादित्येवं विधिशास्त्रमर्थवद्भ
वत्यन्यथा तदनर्थकं स्यात्। तद्धि कर्तुः सतः कर्तव्यविशेषमुपदिशति। न चासति कर्तृत्वे तदुपपद्येत। तथेदमपि शास्त्र
मर्थवद्भवे एष हि द्रष्टा श्रोता मन्ता बोद्धा कर्त्ता विज्ञानात्मा पुरुष इति। विहारोपदेशात्।३४। इतश्च जीवस्य कर्त्तृत्वं यज्जीव
प्रक्रियायां संध्ये स्थाने विहारमुपदिशति स ईयतेऽमृतो यत्र कामम् इति स्वे शरीरे यथाकामं परिवर्त्तत इति च। उपादा
नात्।३५। इतश्चास्य कर्तृत्वं यज्जीवप्रक्रियायामेव करणानामुपादानं संकीर्तयति तदेषां प्राणानां विज्ञानेन विज्ञान
मादायेति प्राणान्गृहीत्वेति च। व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः।३६। इतश्च जीवस्य कर्तृत्वं यदस्य लौ
किकीषु वैदिकीषु च क्रियासु कर्तृत्वं व्यपदिशति विज्ञानं यज्ञं तनुते कर्माणि तनुतेपि चेति। ननु विज्ञानशब्दो बु
द्धौ समधिगतः कथमनेन जीवस्य कर्तृत्वं सूच्यत इति। नेत्युच्यते। जीवस्यैवैष निर्देशो न बुद्धेः। न चेज्जीवस्य नि
र्देशस्ततो विपर्ययः स्यात्। विज्ञानेनेत्येवं निरदेक्ष्यत् तथा ह्यन्यत्र बुद्धिविवक्षायां विज्ञानशब्दस्य करणविभक्ति

निर्देशाद्दृश्यते। तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति। इत्यनु विज्ञानं यज्ञं तनुतेऽ इति कर्तृसामानाधिकरण्यनि
र्देशात् बुद्धिव्यतिरिक्तस्यैवात्मनः कर्तृत्वं स्वत्वन्तरस्य दोषः। अत्राह। यदि बुद्धिव्यतिरिक्तो जीवः कर्ता स्यात्स्वतन्त्रः
सन् प्रियं हितं चैवात्मनो नियमेन संपादयेत् न तद्विपरीतं। विपरीतमपि तु संपादयन्नुपलभ्यते। न च स्वतन्त्रस्यात्मन
ईदृशी प्रवृत्तिरनियमेनोपपद्यत इति। अत उत्तरं पठति। उपलब्धिवदनियमः। ३७। यथायमात्मोपलब्धिं प्रति स्व
तन्त्रोऽप्यनियमेनेष्टमनिष्टं चोपलभते। एवमनियमेनेष्टमनिष्टं च संपादयिष्यति। अनुपलब्धावप्यस्वातन्त्र्यमुपलब्धि
हेतूपादानादिति चेन्न। विषयप्रकल्पनामात्रप्रयोजनत्वादुपलब्धिहेतूनामितरूपलब्धौ त्वनन्यापेक्षत्वमात्म
नश्चैतन्ययोगात्। अपि चार्थक्रियायामपि नात्यन्तमात्मनः स्वातन्त्र्यमस्ति देशकालनिमित्तविशेषापेक्षत्वा
त्। न च सहायापेक्षस्य कर्तुः कर्तृत्वं निवर्तते। भवति ह्येधोदकाद्यपेक्षस्यापि पक्तुः पक्तृत्वं। सहकारिवैचित्र्या १५०
च्चेष्टानिष्टार्थक्रियायामनियमेन प्रवृत्तिरात्मनो न विरुध्यते। शक्तिविपर्ययात्। ३८। इतश्च विज्ञानव्यतिरिक्तो
जीवः कर्ता भवितुमर्हति। यदि पुनर्विज्ञानशब्दवाच्या बुद्धिरेव कर्त्री स्यात्ततः शक्तिविपर्ययः स्यात् करण

शक्तिर्वैदृष्टौ येता कर्तृशक्तिस्स्वापघेत । समांचुबुद्धेः कर्तृत्वे श्रौतस्याहंवाहं प्रत्ययविषयत्वमभ्युपगंतव्यमहंकारपू
र्विकायाः प्रवृत्तेः सर्वत्र दर्शनादहं गच्छाम्यहं भुंजेऽहं पिबामीति च । अतः सास्वकर्तृशक्तिरुक्तापाः सर्वापिक्रियाकारिणः
करणमन्यत्कल्पयितव्यं । अन्योपि हि सन्कर्ता करणमुपादाय क्रियायां प्रवर्त्तमानो दृश्यते इति । तत्र संज्ञामात्रे विसं
वादः स्यात् । न वस्तुभेदः कल्पितात् करणव्यतिरिक्तस्य कर्तृत्वाभ्युपगमात् । समाध्यभावाच्च ॥ योप्ययमौपनिषदात्म
प्रतिपत्तिप्रयोजनः समाधिरुपदिष्टो वेदांतेषु आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्यः सोन्वेष्टव्यः स वि
जिज्ञासितव्यः ॐ इत्येवं ध्यायथ आत्मानमित्येवं लक्षणः सोप्यस्यात्मनः कर्तृत्वेनोपपद्येत । तस्मादप्यस्य कर्तृत्व
सिद्धिः ॥ ३९ ॥ यथा च तक्षोभयथा ॥ ४० ॥ एवं तावच्छास्त्रार्थवत्त्वादिभिर्हेतुभिः कर्तृत्वं शारीरस्य प्रदर्शितं तत्पुनः स्वाभा
विकं स्यादुपाधिनिमित्तं वेति चिंत्यते । तत्रैतैरेव शास्त्रार्थवत्त्वादिभिर्हेतुभिः स्वाभाविकं कर्तृत्वमपवादहेत्वभावा
दित्येवं प्राप्ते ब्रूमः । न स्वाभाविकं कर्तृत्वमात्मनः संभवत्यनिर्मोक्षप्रसंगात् । कर्तृत्वस्वभावत्वे ह्यात्मनो न कर्तृत्वान्निर्मो
क्षः संभवत्यग्नेरिवौष्ण्यात् । न च कर्तृत्वादनिर्मुक्तस्यास्ति पुरुषार्थसिद्धिः कर्तृत्वस्य दुःखरूपत्वात् । ननु स्थितायाम

शा॰भा॰:

पिकर्तृत्वशक्तौ कर्तृत्वकार्यपरिहारात्पुरुषार्थः सेत्स्यति तत्परिहारश्च निमित्तपरिहारात् यथाग्नेर्दहनश
क्तियुक्तस्यापि काष्ठवियोगाद्दहनकार्याभावस्तद्वत् न निमित्तानामपि शक्तिलक्षणेन संबंधेन संबद्धानामत्यंतपरिहा
रासंभवात् ननु मोक्षसाधनविधानान्मोक्षः सेत्स्यति न साधनायत्तस्यानित्यत्वात् अपि च नित्यशुद्धबुद्धमुक्तात्मप्रतिपा
दनान्मोक्षसिद्धिरभिमता तादृगात्मप्रतिपादनं च स्वाभाविककर्तृत्वेऽवकल्पेत तस्मादुपाधिधर्माध्यासेनैवात्मनः
कर्तृत्वं न स्वाभाविकं तथा च श्रुतिर्ध्यायतीव लेलायतीवेति आत्मेंद्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण इति चोपाधिसं
पृक्तस्यैवात्मनो भोक्तृत्वादिविशेषलाभं दर्शयति न हि विवेकिनां परस्मादन्यो जीवो नाम कर्ता भोक्ता वा विद्यते नान्यो
तोऽस्ति द्रष्टेत्यादिश्रवणात् पर एव तर्हि संसारी कर्ता भोक्ता च प्रसज्येत परस्मादन्यश्चेच्चितिमान्न बुद्ध्यादिसंघातव्यति
रिक्तो न स्यात् ना अविद्याप्रत्युपस्थापितत्वात्कर्तृत्वभोक्तृत्वयोः तथा च शास्त्रं यत्र हि द्वैतमिव भवति तदितर इतरं प एम०
श्यतीत्यविद्यावस्थायां कर्तृत्वभोक्तृत्वे दर्शयित्वा विद्यावस्थायां ते एव कर्तृत्वभोक्तृत्वे निवारयति यत्र त्वस्य सर्वमात्मै
वाभूत्तत्केन कं पश्येदिति तथा स्वप्नजागरितयोरात्मन उपाधिसंपर्ककृतं श्रमं श्येनस्येवाकाशे विपरिपततः श्रावयि

त्वात्परमानंदं सुषुप्ते प्राज्ञेनात्मना संपरिष्वक्तः स्वस्यावपति । तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपं शोकांतरमित्यार
भ्येषास्य परमा गतिरेषास्य परमा संपदेषोस्य परमो लोक एषोस्य परम आनंद इत्युपसंहारात्तदेतदाहाचार्यो यथा च तक्षोभ
यथेति । सूत्रं चायं च पठितः । नैवं मंतव्यं स्वाभाविकमेवात्मनः कर्तृत्वमग्नेरिवौष्ण्यमिति । यथा तु लोके तक्षा वास्यादिकरणह
स्तः कर्ता दुःखी भवति । स एव स्वगृहं प्राप्तो विमुक्तवास्यादिकरणः स्वस्थो निर्वृतो निर्व्यापारः सुखी भवत्येवमविद्याप्रत्युपस्था
पितद्वैतसंपृक्त आत्मा स्वप्नजागरितावस्थयोः कर्ता दुःखी भवति स तच्छ्रमापनुत्तये स्वमात्मानं परं ब्रह्म प्रविश्य विमुक्तका
र्यकरणसंघातोऽकर्ता सुखी भवति संप्रसादावस्थायां । तथा मुक्त्यवस्थायामविद्याध्वांतं विद्याप्रदीपेन विधूयात्मैव केवलो नि
र्वृतः सुखी भवति । तक्षदृष्टांतश्चैतावतांशेन द्रष्टव्यः । तक्षा हि विशिष्टेषु तक्षणादिव्यापारेष्वपेक्ष्यैव प्रतिनियतानि वास्या
दीनि करणानि कर्ता भवति । स्वशरीरेण त्वकर्तैवमयमात्मा सर्वव्यापारेष्वपेक्ष्यैव मनआदीनि कर्ता भवति । स्वात्मना त्वकर्ते
ति । न त्वात्मनस्तक्ष्ण इवावयवाः संति यैर्हस्तादिभिरिव वास्यादीनि तक्षा मनआदीनि करणान्यात्मोपाददीत न्यसेद्वा । यत्तू
क्तं शास्त्रार्थवत्त्वादिभिर्हेतुभिः स्वाभाविकमात्मनः कर्तृत्वमिति । तत्र विधिशास्त्रं तावद्यथाप्राप्तं कर्तृत्वमुपादाय कर्तव्यवि

21

शा॰भा॰

ऽशेषमुपदिशति। न कर्तृत्वमात्मनः प्रतिपादयति। न च स्वाभाविकमस्य कर्तृत्वमस्ति ब्रह्मात्मत्वोपदेशादित्यवोचाम। तत्
स्मादविद्याकृतं कर्तृत्वमुपादाय विधिशास्त्रं प्रवर्तिष्यते। कर्ता विज्ञानात्मा पुरुष इत्येवंजातीयकमपि शास्त्रमनुवाद
रूपत्वाद्यथाप्राप्तमेवाविद्याकृतं कर्तृत्वमुपादाय विधिशास्त्रं प्रवर्तिष्यते। कर्ता विज्ञानात्मा पुरुष इत्येवंजातीयकम
पि शास्त्रमनुवादरूपत्वाद्यथाप्राप्तमेवाविद्याकृतं कर्तृत्वमनुवदिष्यति। एतेन विहारोपादाने परिहृते। तयोरप्यनु
वादरूपत्वात्। ननु सन्ध्ये स्थाने प्रसुप्तेषु करणेषु स्वे शरीरे यथाकामं परिवर्तत इति विहार उपदिश्यमानः कर्तृत्वमाव
हति। तथोपादानेऽपि तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति करणेषु कर्मकरणविभक्त्योर्निर्देशात् केवलस्यात्म
नः कर्तृत्वमवगम्यत इति। अत्रोच्यते। न तावत्सन्ध्ये स्थाने संतमात्मनः करणविरमणमस्ति। सधीः स्वप्नो भूत्वेमं लोकमतिक्रा
मतीति तत्रापि धीसम्बन्धश्रवणात्। तथा च स्मरन्ति। इन्द्रियाणामुपरमे मनोऽनुपरतं यदि सेवते विषयान्मनसा तद्विद्यात्स्वप्नदर्श राम ०
नमिति। कामादयश्च मनसो वृत्तय इति श्रुतिः। ताश्च स्वप्ने दृश्यन्ते। तस्मात्समना एव स्वप्ने विहरति। विहारोऽपि च तत्र वासना
मय एव। न तु पारमार्थिकोऽस्ति। तथा च श्रुतिरिवकारेणैव स्वप्नव्यापारं वर्णयति। उतेव स्त्रीभिः सह मोदमानो जक्ष

द्रुतेवाऽपि भवानि पश्यन्निति। लौकिका अपि तथैव स्वप्नं कथयंति। आहुः हस्तिनमिव गिरिशृंगमद्राक्षमिव वनमेनमिति।
तयोपाख्यापि करणोपकर्मकरणाविभक्तिनिर्देशस्तथापितत्स्वप्नदृष्टॄणां स्वात्मनः कर्तृत्वं द्रष्टव्यं केवलं कर्तृत्वं संभव
स्तद्भिन्नत्वात्तत्राभवति च लोकेनैकप्रकार इति विवक्षापोषाय ध्यंतेयोधेरज्ञापध्यत इति। अपिचास्मिन्नुपादाने करणव्या
पारोपरममात्रं विवक्षितेन स्वातंत्र्यं कस्यचिद्बुद्धिः एवं कस्यापि स्यापेकरणव्यापारोपरमस्य हि दृष्टत्वात्। तापस्वयं व्यपदेशो दर्शितो
विज्ञानं यज्ञं तनुत इति सुषुप्तेरेव कर्तृत्वं प्रापयति विज्ञानशब्दस्य बुद्धौ तत्र प्रसिद्धत्वात्मनोनंतरपाठाच्चात्तस्य श्रद्धैव शि
र इति च विज्ञानमस्यात्मनः श्रेष्ठ्यवयवसंकीर्तनाच्छ्रद्धादीनां च बुद्धिधर्मत्वप्रसिद्धेः विज्ञानं देवाः सर्वे ब्रह्म ज्येष्ठमुपा
सत इति च वाक्यशेषात्। श्रेष्ठस्य च प्रथमजत्वस्य बुद्धौ प्रसिद्धत्वात्। स एष वाचश्चित्तस्योत्तरोत्तरक्रमो यद्यज्ञ इति च श्रुतं
तरेयकस्य वाग्बुद्धिसाध्यत्वावधारणात्। न च बुद्धेः शक्तिविपर्ययः करणानां कर्तृत्वाभ्युपगमे भवति। सर्वकारकाणा
मेव स्वव्यापारेषु कर्तृत्वस्यावश्यंभावित्वादुपलब्ध्यपेक्षं त्वेषां करणत्वं सा चात्मनो। न च तस्यामप्यस्य कर्तृत्वमस्ति
नित्योपलब्धिस्वरूपत्वात्। अहंकारपूर्वकमपि कर्तृत्वं नोपलब्धुर्भवितुमर्हति अहंकारस्याप्युपलभ्यमानत्वात्। न चैवं सति

शा०भा०

करणान्तरकल्पनाप्रसंगो बुद्धेः करणत्वाभ्युपगमात्। समाध्यभावस्तु शास्त्रार्थवत्त्वेनैव परिहृतः। यथाप्राप्तमेव कर्तृत्व-
मुपादाय समाधिविधानात्। तस्मात्कर्तृत्वमप्यात्मन उपाधिनिबंधनमेवेति स्थितं।१६। परात्तु तच्छ्रुतेः।४१। यदिदमविद्याव-
स्थायां कार्यकरणोपाधिनिबंधनं कर्तृत्वं जीवस्याभिहितं तत्किमनपेक्ष्येश्वरं भवत्याहोस्विदीश्वरापेक्षमिति भवति विचारणा। तत्र
प्राप्तं तावन्नेश्वरमपेक्षते जीवः कर्तृत्व इति कस्मात् अपेक्षाप्रयोजनाभावात् अयं हि जीवः स्वयमेव रागद्वेषादिदोषप्र-
युक्तः कारकान्तरसामग्रीसंपन्नः कर्तृत्वमनुभवितुं शक्नोति तस्य किमीश्वरः करिष्यति न च लोके प्रसिद्धिरस्ति। कृ-
ष्यादिकासु क्रियास्वनडुहादिवदीश्वरोपेक्षितव्य इति। क्लेशात्मकेन च कर्तृत्वेन जन्तून्संसृजत ईश्वरस्य नैर्घृण्यं प्र-
सज्येत। विषमफलं चैषां कर्तृत्वं विदधतो वैषम्यं। ननु वैषम्यनैर्घृण्ये न सापेक्षत्वादित्युक्तं। सत्यमुक्तं सति त्वीश्व-
रस्य सापेक्षत्वसंभवे सापेक्षत्वं चेश्वरस्य संभवति सतोर्जन्तूनां धर्माधर्मयोः तयोश्च सद्भावः सति जीवस्य कर्तृत्वे तदे- राम०
व चेत्कर्तृत्वमीश्वरापेक्षं स्यात्किं विषयमीश्वरस्य सापेक्षत्वमुच्येत। अकृताभ्यागमश्चैवं जीवस्य प्रसज्येत। तस्मात्स्वत
एवास्य कर्तृत्वमित्येतां प्राप्तामाशंकां तुशब्देन व्यावर्त्य प्रतिजानीते परादिति। अविद्यावस्थायां कार्यकरणसंघात

विवेकदर्शिनो जीवस्याविद्यातिमिरांधस्य सततः परस्मादात्मनः कर्माध्यक्षात् सर्वभूताधिवासात् साक्षिणः चेतयितुरीश्व
रात् तदनुज्ञया कर्तृत्वभोक्तृत्वलक्षणस्य संसारस्य सिद्धिः तदनुग्रहहेतुकेन च विज्ञानेन मोक्षस्य सिद्धिर्भवितुमर्हति। कुतस्तच्छ्रुतेः।
यद्यपि रागादिदोषप्रयुक्तः सामग्रीसंपन्नश्च जीवो यद्यपि च लोके कृष्यादिषु कर्मसु नेश्वरकारणत्वं प्रसिद्धं तथापि सर्वास्वेव प्रवृ
त्तिष्वीश्वरो हेतुकर्तेति श्रुतेरवसीयते। तथा हि श्रुतिर्भवति एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते। एष उ ए
वासाधु कर्म कारयति तं यमधो निनीषत इति। य आत्मनि तिष्ठन्नात्मानमन्तरो यमयतीति चैवंजातीयका। नन्वेवमीश्वरस्य का
रयितृत्वे सति वैषम्यनैर्घृण्ये स्यातामकृताभ्यागमश्च जीवस्येति नेत्युच्यते॥ कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः।
४२ तुशब्दश्चोदितदोषव्यावर्तनार्थः। कृतो यः प्रयत्नो जीवस्य धर्माधर्मलक्षणस्तदपेक्ष एवैनमीश्वरः कारयति। ततश्चैते चोदि
ता दोषा न प्रसज्यन्ते। जीवकृतधर्माधर्मवैषम्यापेक्ष एव तत्फलानि विषमानि विभजते पर्जन्यवदीश्वरो निमित्तत्वमात्रेण। यथा लो
के नानाविधानां गुच्छगुल्मादीनां व्रीहियवादीनां चासाधारणेभ्यः स्वबीजेभ्यो जायमानानां साधारणं निमित्तं भवति पर्जन्यः।
न ह्यसति पर्जन्ये रसपुष्पफलपलाशादिवैषम्यं तेषां जायते। नाप्यसत्सु स्वबीजेषु। एवं जीवकृतप्रयत्नापेक्ष ईश्वरस्तेषां शु

23

शा॰भा॰ पुमं विद्यादिति श्लिष्यते। ननु कृतप्रयत्नापेक्षत्वमेव जीवस्य परायत्ते कर्तृत्वे नोपपद्यते। नैष दोषः। परायत्तेपि कर्तृत्वे करोत्ये
व जीवः। कुर्वन्तं हि तमीश्वरः कारयति। अपि च पूर्वप्रयत्नमपेक्ष्येदानीं कारयति पूर्वतरं च प्रयत्नमपेक्ष्य पूर्वमकारयदित्यना
दित्वात्संसारस्येत्यनवद्यं। कथं पुनरवगम्यते कृतप्रयत्नापेक्ष ईश्वर इति। विहितप्रतिषिद्धावैयर्थ्यादिभ्य इत्याह। एवं हि स्व
र्गकामो यजेत ब्राह्मणो न हन्तव्य इत्येवंजातीयस्य विहितस्य प्रतिषिद्धस्य चावैयर्थ्यं भवति। अन्यथा तदनर्थकं स्यात्। ई
श्वर एव विधिप्रतिषेधयोर्नियुज्येतात्यन्तपरतन्त्रत्वाज्जीवस्य। तथा विहितकारिणमप्यनर्थेन संसृजेत् प्रतिषिद्धकारि
णमप्यर्थेन ततः प्रामाण्यं वेदस्यास्तमियात्। ईश्वरस्य चात्यन्तानपेक्षत्वे लौकिकस्यापि पुरुषकारस्य वैयर्थ्यं तथा दे
शकालनिमित्तानां पूर्वोक्तदोषप्रसंगश्च इत्येवंजातीयकं दोषजातमादिग्रहणेन दर्शयति। ४२। अंशो नानाव्यपदेशादे
न्यथा चापि दाशकितवादित्वमधीयत एके ।४३। जीवेश्वरयोरुपकार्योपकारकभाव उक्तः। स च संबद्धयोरेव दृष्टो लो
के यथा स्वामिभृत्ययोर्यथा वाग्निविस्फुलिंगयोः। ततश्च जीवेश्वरयोरप्युपकार्योपकारकभावाभ्युपगमात्किं स्वामिभृ
त्यवत्संबंध आहोस्विदग्निविस्फुलिंगवदित्यस्यां विचिकित्सायामनियमो वा प्राप्नोत्यथवा स्वामिभृत्यप्रकार एवेशि

रा॰म॰

र्भोक्तृत्वाभावस्य प्रसिद्धत्वात् जगद्द्विध एव संबध्यत इति प्राप्ते इति । अतोऽब्रवीत् अंश इति । जीव ईश्वरस्यांशो भवितुमर्हति यथाग्नेर्विस्फु
लिंगः । अंश इवांशः । न हि निरवयवस्य मुख्योंशः संभवति । कस्मात् पुनः निरवयवत्वात् स एव न भवति । नानाव्यपदेशात् । सो
न्वेष्टव्यः स विजिज्ञासितव्य एतमेव विदित्वा मुनिर्भवति । य आत्मनि तिष्ठन्नात्मानमन्तरो यमयतीत्येवंजातीयको भेदनिर्देशो
नासति भेदे युज्यते । ननु चायं नानाव्यपदेशः सुतरां स्वामिभृत्यसदृशेष्वेवोपपद्यत इत्यत आह । अन्यथा चापीति । न च नानाव्यपदेशा
देव केवलादंशत्वप्रतिपत्तिः । किं तर्ह्यन्यथा चापि व्यपदेशो भवत्यनानात्वस्य प्रतिपादकः । तथा ह्येके शाखिनो दाशकित
वादिभावं ब्रह्मण आमनन्त्याथर्वणिका ब्रह्मसूक्ते । ब्रह्म दाशा ब्रह्म दासा ब्रह्मैवेमे कितवा इत्यादिना दाशा य एते कैवर्ताः प्रसिद्धा ये चा
मी दासाः स्वामिष्वात्मानमुपक्षपयन्ति । ये चान्ये कितवा द्यूतकृतस्ते सर्वे ब्रह्मैवेति हीनजन्तूदाहरणेन सर्वेषामेव ना
मरूपकृतकार्यकरणसंघातप्रविष्टानां जीवानां ब्रह्मत्वमाह । तथान्यत्रापि ब्रह्मप्रक्रियायामेवायमर्थः प्रपञ्च्यते । त्वं स्त्री त्वं पु
मानसि त्वं कुमार उत वा कुमारी त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवसि विश्वतोमुख इति । सर्वाणि रूपाणि विचित्य धीरो ना
मानि कृत्वाभिवदन्यदास्ते इति च । नान्योतोस्ति द्रष्टेत्यादिश्रुतिभ्यश्चास्यार्थस्य सिद्धिः । चैतन्यं चाविशिष्टं जीवेश्वरयोर्यथाग्निविस्फुलिं

शा॰भा॰ गयोरैक्यापमतो भेदाभेदावभेदावगमाभ्यामंशत्वावगमः। कुतश्चांशत्वावगमः। मंत्रवर्णात्।४४। मंत्रवर्णश्चैतमर्थमव
गमयति। एतावानस्य महिमा ततो ज्यायांश्च पूरुषः। पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवीति। अत्र भूतशब्देन जीवप्रधाना
नि स्थावरजंगमानि निर्दिशत्यहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्य इति प्रयोगात्। अंशः पादो भाग इत्यनर्थान्तरं। तस्मादप्यं
शत्वावगमः। कुतश्चांशत्वावगमः। अपि च स्मर्यते।४५। ईश्वरगीतास्वपि चेश्वरांशत्वं जीवस्य स्मर्यते ममैवांशो जीवलो
के जीवभूतः सनातनः इति। तस्मादप्यंशत्वावगमः। यत्तूक्तं स्वामिभृत्यादिष्वेवेशित्रीशितव्यभावो लोके प्रसिद्ध इति। य
द्यप्येषा लोकप्रसिद्धिः। शास्त्रात्त्वत्रांशांशित्वमीशित्रीशितव्यभावश्च निश्चीयते। निरतिशयोपाधिसंपन्नश्चेश्वरो निही
नोपाधिसंपन्नान् जीवान्प्रशास्तीति न किंचिद्विप्रतिषिध्यते। अत्राह ननु जीवस्येश्वरांशत्वाभ्युपगमे तदीयेन संसा
रदुःखोपभोगेनांशिन ईश्वरस्यापि दुःखित्वं स्यात्। यथा लोके हस्तपादाद्यन्यतमांगगतेन दुःखेनांगिनो देवदत्तस्य दुः राम०
खित्वं तद्वत्। ततश्च तत्प्राप्तानां महत्तरं दुःखं प्राप्नुयादतो वरं पूर्वावस्थः संसार एवास्त्विति सम्यग्दर्शनानर्थक्यप्रसंगः स्यादि
ति। अत्रोच्यते। प्रकाशादिवन्नैवं परः।४६। यथा जीवः संसारदुःखमनुभवति नैवं पर ईश्वरोऽनुभवतीति प्रतिजानीमहे। जीवो ह्य

विद्यावेशवशादेहाद्यात्मभावमिवगच्छतस्तत्कृतेन दुःखेन दुःख्यहमित्यविद्याकृतं दुःखोपभोगमभिमन्यते। नैवं परस्येश्वर
स्य देहाद्यात्मभावो दुःखाभिमानो वास्ति। जीवस्याप्यविद्याकृतनामरूपनिर्वृत्तदेहेन्द्रियाद्युपाध्यविवेकभ्रमनिमित्त एव दुःखा
खाभिमानो वास्ति। जीवस्याप्यविद्याकृतनामरूपनिर्वृत्तदेहेन्द्रियाद्युपाध्यविवेकभ्रमनिमित्त एव दुःखाभिमानो न तु पा
रमार्थिकोऽस्ति। यथा च स्वदेहगतदाहच्छेदादिनिमित्तं दुःखं तदभिमानभ्रान्त्यैवानुभवति तथा पुत्रमित्रादिगोचरम
पि दुःखं तदभिमानभ्रान्त्यैवानुभवति। अहमेव पुत्रोऽहमेव मित्रमित्येवं स्नेहवशेन पुत्रमित्रादिष्वभिनिविश्यमाने
स्ततश्च निश्चितमेवैतदवगम्यते मिथ्याभिमानभ्रमनिमित्त एव दुःखानुभव इति। व्यतिरेकदर्शनाच्चैवमवगम्यते। त
था हि पुत्रमित्रादिमत्सु बहुषु प्रविष्टेषु तत्संबन्धाभिमानिष्वितरेषु च पुत्रो मृतो मित्रं मृतमित्येवमवघोषिते येषा
मेव पुत्रमित्रादिमत्त्वाभिमानस्तेषामेव तन्निमित्तं दुःखमुत्पद्यते। नाभिमानहीनानां परिव्राजकानाम्। अतश्च लौकि
कस्यापि पुंसः सम्यग्दर्शनार्थवत्त्वं दृष्टं किमुत विषयशून्यादात्मनोऽन्यद्वस्त्वन्तरमपश्यतो नित्यचैतन्यमात्रस्वरू
पस्येति। तस्मान्नास्ति सम्यग्दर्शनानर्थक्यप्रसंगः। प्रकाशादिवदिति निदर्शनोपन्यासः। यथा प्रकाशः सौरश्चान्द्रमस

शा:भा: सोपि वा वियद्व्याप्यावतिष्ठमानोंगुल्याद्युपाधिसंबंधात्तेषु ऋजुवक्रादिभावं प्रतिपद्यमानोपि न परमार्थतस्तद्भावं प्रति
पद्यते यथा चाकाशो घटादिषु गच्छत्सु गच्छन्निव विभाव्यमानोपि न परमार्थतो गच्छति यथा चोदकशरावकंपनात्तद्गते
सूर्यप्रतिबिंबे कंपमानेपि न तद्वान् सूर्यः कंपते । एवमविद्याप्रत्युपस्थापिते बुद्ध्याद्युपहिते जीवाख्येंशे दुःखायमानेपि न त
द्वानीश्वरो दुःखायते जीवस्यापि दुःखप्राप्तिरविद्यानिमित्तैवेत्युक्तं । तथा चाविद्यानिमित्तजीवभावव्युदासेन ब्रह्मभा
वमेव जीवस्य प्रतिपादयंति वेदांतास्तत्त्वमसीत्येवमादयः । तस्मान्नात्मनिमित्तेन दुःखेन परमात्मनो दुःखित्वप्रसं
गः ॥ स्मरंति च ॥ ४७ ॥ स्मरंति च व्यासादयो यथा न जीवेन दुःखेन परमात्मा दुःखायत इति तत्र यः परमात्मा हि स नित्यो
निर्गुणत्वतः । न लिप्यते फलैश्चापि पद्मपत्रमिवांभसा ॥ कर्मात्मा त्वपरो योसौ मोक्षबंधैः स युज्यते । स सप्तदशकेना
पि राशिना युज्यते पुनः ॥ इति । चशब्दात्समामनंति चेति वाक्यशेषः । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति राम०
ति । एकस्तथा सर्वभूतांतरात्मा न लिप्यते लोकदुःखेन बाह्य इति च ॥ अत्राह । यदि तर्ह्येक एव सर्वेषां भूतानामंत
रात्मा स्यात्कथमनुज्ञापरिहारौ स्यातां लौकिकौ वैदिकौ चेति । ननु चांशो जीव ईश्वरस्येत्युक्तं तद्भेदाच्चानुज्ञापरि

हारैक्यात्तदाप्यस्य यावत्स्थितिकीर्णोऽपपद्यते किमत्र बोध्यत इतीत्र व्यक्तेनेन देवमनंतत्वमपि हि जीवस्यामेहवादिनः स्वतः
प्रतिपादयेति। तस्यैव्यन्तर्देवात्प्राविष्टत्वान्मोतोस्ति इहाम्मोः समस्तमाप्नोति परइहनान्तेवपपद्यते। तिनत्वमस्य हं ब्रह्मास्मीत्ये
वं ज्ञातोऽपि कोः। ननु भेदाभेदावुणामाम्नामंशत्वमपि प्रसिद्धमितीत्युक्तः। स्यादेतदेवं यद्युभावपि भेदौ प्रतिपिपादयिषितौ स्याताम
मभेद एव स्वतंत्रप्रतिपिपादयिषितोऽत्र ज्ञात्मताप्रतिपत्तौ उपषार्थमस्ति हेतुः स्वभावप्राप्तस्तु भेदो नद्युततानचनिरवपॅस्य ब्रह्मणो मु व
क्तोऽशो जीवः संभवतीत्युक्तं। तस्माद्प्य एवैकः सर्वेषां भगवान्मंत्र एतमाजीवभावेनावस्थित इत्यस्मत्तो वक्तव्यानुज्ञापरिहारो
पपत्तिस्तां ब्रमः॥ अनुज्ञापरिहारौ देहसंबंधाज्ज्योतिरादिवत्॥४८॥ अनोभार्यामुपेयादित्यनुज्ञा। गुर्वंगनां नोपगच्छेदिति
परिहारः। तथाग्नीषोमीयं पशुं संज्ञपयेदित्यनुज्ञा। न हिंस्यात्सर्वा भूतानीति परिहारः। एवं लोकेऽपि मित्रमुपसेवितव्यमित्यनु
ज्ञा। शत्रुः परिहर्तव्य इति परिहारः। एवंप्रकारावनुज्ञापरिहारावेकत्वेऽप्यात्मनो देहसंबंधात्स्याताम्। देहैः संबंधो देहसंबंधः।
कः पुनरयं देहादिसंबंधः। देहादिरयं संघातोऽहमेवेत्यात्मनि विपरीतप्रत्ययोत्पत्तिः। दृष्टा च सा सर्वेषां प्राणिनामहमागच्छा
म्यहं गच्छामि अहमंधोऽहं मूढोऽहं पंडितोऽहमित्येवमात्मिका। न ह्यस्याः सम्यग्दर्शनादन्यन्निवारकमस्ति। प्राक्तु सम्यग्दर्शनात्प्रततैषाभ्रांतिः

शा॰।भ॰ सर्वजंतुष्वात्तदेवमविद्यानिमित्तदेहाद्युपाधिसंबंधकृताद्विशेषादैकात्म्याभ्युपगमेप्यनुज्ञापरिहाराववकल्पेते।सम्यग्द
र्शिनस्तर्ह्यनुज्ञापरिहारानर्थक्यंप्राप्तंतेनतस्यकृतार्थत्वान्नियोज्यत्वानुपपत्तेः।हेयोपादेययोर्हिनियोज्यौनियोज्योनियोक्तव्यःस्या
त्।आत्मनस्त्वतिरिक्तंहेयमुपादेयंवावस्त्वपश्यन्कथंनियुज्येत।नचात्मात्मन्येवनियोज्यःस्यात्।शरीरव्यतिरेकदर्शिनए
वनियोज्यत्वमितिचेत्।नतत्संहतत्वाभिमानात्।सत्यंव्यतिरेकदर्शिनोनियोज्यत्वं।तथापिव्योमादिवद्देहाद्यसंहतत्वमप
श्यतएवात्मनोनियोज्यत्वाभिमानः।नहिदेहाद्यसंहतत्वदर्शिनःकस्यचिदपिनियोगोदृष्टः।किमुतैकात्म्यदर्शिनो।नचनि
योगाभावात्सम्यग्दर्शिनोयथेष्टचेष्टाप्रसंगः।सर्वत्राभिमानस्यैवप्रवर्तकत्वात्।अभिमानाभावाच्चसम्यग्दर्शिनस्तस्मा
देहसंबंधादेवानुज्ञापरिहारौ।ज्योतिरादिवत्।यथाज्योतिषएकत्वेप्यग्निःक्रव्यात्परिह्रियतेनेतरो।यथाचप्रकाशएकस्या
पिसवितुरमेध्यप्रदेशसंबंधःपरिह्रियतेनेतरःशुचिभूमिप्रतिष्ठः।यथाभौमाःप्रदेशावज्रवैडूर्यादयउपादीयंतेभौमाअपि राम॰
संतोनरकलेवरादयःपरिह्रियंते।यथामूत्रपुरीषंगवांपवित्रतयापरिगृह्यतेतदेवजात्यंतरेपरिवर्ज्यतेतद्वत्॥असंततेश्चा
व्यतिकरः॥४९॥स्यातांनामानुज्ञापरिहारावेकस्याप्यात्मनोदेहविशेषयोगात्।यस्त्वयंकर्मफलसंबंधःसऐकात्म्याभ्युपगमेव्य

तिकीर्येत स्वाम्येकत्वादिति चेन्नैतदेवमसंततेः। नहि कर्तुर्भोक्तुरात्मनः संततः सर्वैः शरीरैः संबंधोस्ति। उपाधितंत्रो हि जीव इत्युक्तं।
उपाध्यसंतानाच्च नास्ति जीवसंतानः। ततश्च कर्मव्यतिकरः फलव्यतिकरो वा न भविष्यतीति॥ ॥आभास एव च॥ ५०॥ आभास एव
चैष जीवः परस्यात्मनो जलसूर्यकादिवत्प्रतिपत्तव्यः। न स एव साक्षान्नापि वस्त्वंतरं। अतश्च यथा नैकस्मिन् जलसूर्यके कंपमा
ने जलसूर्यकांतरं कंपते। एवं नैकस्मिन् जीवे कर्मफलसंबंधिनि जीवांतरस्य तत्संबंधः। एवमप्यव्यतिकर एव कर्मफलयोराभास
स्याविद्याकृतत्वात्तदाश्रयस्य संसारस्याविद्याकृतत्वोपपत्तिः। तद्व्युदासेन च पारमार्थिकस्य ब्रह्मभावस्योपदेशोपप
त्तिः। येषां तु बहव आत्मानस्ते च सर्वे सर्वगतास्तेषामेवैष व्यतिकरः प्राप्नोति। कथं। बहवो विभव आत्मानश्चैतन्यमात्रस्वरू
पा निर्गुणा निरतिशयाश्च। तदर्थं साधारणं प्रधानं तन्निमित्तैषां भोगापवर्गसिद्धिरिति सांख्याः। सति बहुत्वे वि
भुत्वे च घटकुड्यादिसमा द्रव्यमात्रस्वरूपाः स्वतोऽचेतना आत्मानस्तदुपकरणानि चाणूनि मनांस्यचेतनानि। तत्रात्मद्रव्या
णां मनोद्रव्याणां च संयोगान्नव विशेषा इच्छादयो वैशेषिका आत्मगुणा उत्पद्यंते। ते चाव्यतिकरेण प्रत्येकमात्मसु समवयंति स संसा
रः। तेषां नवानामात्मगुणानामत्यंतानुत्पादो मोक्ष इति काणादाः। तत्र सांख्यानां तावच्चैतन्यस्वरूपत्वात्सर्वात्मनां संनिधाना

शा॰भा॰ घविशेषाच्चैकस्य सुखदुःखसंबंधे सर्वेषां सुखदुःखसंबंधः प्राप्नोति। स्यादेतत् प्रधानप्रवृत्तेः पुरुषकैवल्यार्थत्वाद्व्यवस्था भ
विष्यति। नन्वेवमप्याहि स्वमुक्तिख्यापनार्था प्रधानप्रवृत्तिः सा तत्त्वज्ञानान्निर्मोक्षः प्रसज्येतेति नैतत्सारं नस्युभिलषितसिद्धि निर्बंधना
व्यवस्था शक्या विज्ञातुं। उपपत्त्या तु कयाचिद्व्यवस्थोच्यते। समांशे न रूपपत्तौ कामं मामूदभिलषितं पुरुषकैवल्यं प्राप्नोति तु व्य
वस्था हेत्वभावाद्युतिकरः। कारणान्तरानामपि यदेकेनात्मना मनःसंप्रयुक्तेन तदात्मांतरैरपि नांतरीयकः संयोगः स्यात् संनि
धानाद्यविशेषात्। ततत्रमभ्रहे तु विशेषात्फलाविशेषप्रसंगे एकस्यात्मनः सुखदुःखयोगे सर्वात्मनामेव समानसुखदुःखत्वं
प्रसज्येत। स्यादेतद्दृष्टनिमित्तो नियमो भविष्यतीति नैतत्साधु। अदृष्टानियमात्। ५१। बहुष्वात्मसु सर्वगतेषु प्रतिशरीरं बा
ह्यान्तरविशेषेण संनिहितेषु मनोवाक्कायैर्धर्माधर्मलक्षणमदृष्टमुपार्ज्यते। सांख्यानां तावन्न तदात्मसमवायि प्रधानव
र्ति प्रधानसाधारणत्वान्न प्रत्यात्मं सुखदुःखोपभोगस्य नियामकमुपपद्यते। काणादानामपि एवं वस्तु साधारणेनात्ममनःसंयो राम॰
गेन निर्वर्तितस्यादृष्टस्यास्येवात्मनः इदमदृष्टमिति नियमहेत्वभावादेष एव दोषः। स्यादेतदहमिदं फलं प्राप्नुवानिदं परि
हराणीत्यस्य प्रयतेयेत्यं करवाणीत्येवंविधा अभिसंध्यादयः प्रत्यात्मं प्रवर्तमाना नादृष्टस्यात्मनां च स्वस्वामिभावं नियम्यंतीति

तिनेमाह॥ अभिसंध्यादिष्वपि चैवं॥४१॥ अभिसंध्यादीनामपि साधारणेनैवात्ममनःसंयोगेन सर्वात्मसंनिधौ क्रियमाणा
नां नियमहेतुत्वानुपपत्तेः तेष्वेषानुपपत्तिरेव॥ प्रदेशादिति चेन्नान्तर्भावात्॥४२॥ अथोच्येत विभुत्वेप्यात्मनः शरीरप्रतिष्ठेन मन
सः संयोगः शरीरावच्छिन्न एवात्मप्रदेशे भविष्यतीति तन्न प्रदेशकृतावस्थाभिसंध्यादीनामदृष्टस्य सुखदुःखयोरप्यभवि
ष्यतीति। अन्तर्भावेनोपपद्यते। कस्मात् अन्तर्भावात्। विभुत्वाविशेषादिति सर्व एवात्मानः सर्वशरीरेष्वन्तर्भवन्तीति तत्र न वैशेषि
कैः शरीरावच्छिन्नो ह्यात्मप्रदेशः शक्यः कल्पयितुं कस्मान्नोपपद्यते निष्प्रदेशस्यात्मनः प्रदेशः काल्पनिकत्वादेवं तथा
रमार्थिकः कार्यनिष्पत्तेः संक्रांतिशरीरमपि सर्वात्मसंनिधावुत्पद्यमानमस्यात्मनो नेतरेषामिति न नियंतुं शक्यं। प्रदेश
विशेषाभ्युपगमेपि च द्वयोरात्मनोः सुखदुःखभाजोः कदाचिदेकेनैव तावच्छरीरेणोपभोगसिद्धिः स्यात्समानप्रदे
शस्यापि द्वयोरात्मनोरदृष्टसंभवात् तथा हि देवदत्तो यस्मिन्प्रदेशे सुखदुःखमन्वभूत् तस्मात्प्रदेशादपक्रांते तच्छ
रीरे यज्ञदत्तशरीरे च तस्मिन्प्रदेशमनुप्राप्ते तस्यापीतरेणात्मना सुखदुःखानुभवो दृश्यते सन्तमस्याधादिदृष्टं तयोरन्यतरदन्ययोः
समानप्रदेशमदृष्टं न स्यात्। स्वर्गोद्युपभोगप्रसंगश्च प्रदेशवादिनः स्यात्। ब्राह्मणादिशरीरप्रदेशेष्वदृष्टे निष्पन्ने प्रदे

शा॰भा॰ शंतरवर्तित्वाच्च सुखदुःखोपभोगस्य सर्वगतत्वस्योपपत्तिश्च बहूनामात्मनां दृष्टान्ताभावाच्च दृष्टान्तातुल्यं केवलं बहवः समानदेशाश्च।
रूपाद्य इति चेत्। न तेषामपि धर्मिभेदेन भेदात्। लक्षणभेदाच्च। न तु बहूनामात्मनां लक्षणभेदोऽस्ति। अंत्यविशेषवशाद्भेदोपप
त्तिरिति चेन्न भेदकल्पनाया अंत्यविशेषकल्पनायाश्चेतरेतराश्रयत्वात्। आकाशादीनामपि विभुत्वं ब्रह्मवादिनोऽसिद्धं का
र्यत्वाभ्युपगमात्। तस्मादात्मैकत्वपक्ष एव सर्वदोषाभाव इति सिद्धं॥ ॥इति श्रीशारीरकमीमांसाभाष्ये श्रीशंकरभगवत्पाद
कृतौ द्वितीयस्याध्यायस्य तृतीयः पादः॥ ॥१ तथा प्राणाः १। वियदादिविषयः श्रुतिविप्रतिषेधस्तृतीयेन पादेन परिहृत
श्चतुर्थेनेदानीं प्राणादिविषयः परिह्रियते। तत्र तावत् तेजोऽसृजतेति तस्माद्वा एतस्मादात्मन आकाशः संभूत इति चैवमादि
षूत्पत्तिप्रकरणेषु प्राणानामुत्पत्तिर्नाम्नायते। क्वचिच्चानुत्पत्तिरेवैषामाम्नायते। असद्वा इदमग्र आसीत्तदाहुः किं तदसदि
त्यृषयो वाव तेऽग्रेऽसदासीत्तदाहुः के ते ऋषय इति प्राणा वाव ऋषय इत्यत्र प्रागुत्पत्तेः प्राणानां सद्भावश्रवणात् एम
अन्यत्र तु प्राणानामप्युत्पत्तिः पठ्यते। यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणा इति एतस्माज्जायते प्राणो
मनः सर्वेन्द्रियाणि चेति सर्वे प्राणाः प्रभवन्ति तस्मादिति च। सप्त प्राणाम

मिति चैवमादिश्रुत्यन्तरेभ्यः ॥ तत्र श्रुतिप्रतिषेधादन्यत्र निर्द्धारणकारणानिरूपणादप्रतिपत्तिः प्राप्नोति ॥ अथवा प्राय
सत्रेः समुद्रवत्स्वकुणां द्वोतिप्राणानामसति ब्रह्मतिरिक्ति प्राप्नोति ॥ अत इदं पठति ॥ तथा प्राण इति ॥ कथं पुनरत्र तथेत्यस्य
अनुलोमं ॥ प्रकृतोपमानाभावात् ॥ सर्वगतानां बुद्ध्यादिदूषणमतीतानन्तरपादान्तेऽप्रकृतां तत्र अन्योपमानं संभवति ॥ सा
दृश्याभावात् ॥ सादृश्ये हि सत्युपमानं स्यात् यथा सिंहस्तथा बलवर्मेति ॥ अदृष्टसाम्यप्रतिपादनार्थमिति पृष्ठे चेन्न ॥ प
श्चाद्दृष्टस्य सर्वस्मिन्निधीतुत्पद्यमानस्यानित्यत्वमेवं प्राणानामपि सर्वात्मनः प्रसन्निपत्तत्वमिति ॥ तदपि देहान्तिय
मे नैवोक्तस्यात् पुनरुक्तं भवेत् ॥ न च जीवेन प्राणोऽनुपमीयेरन् ॥ सिद्धान्तविरोधात् ॥ जीवस्य ह्युत्पत्तिः प्रत्याख्याता प्राणा
नां तु स्मृतिः प्रदर्शिता सिद्धा ॥ तस्मान्न त्वेतस्य संबन्धमिव प्रतिभाति ॥ नानुदाहरणेऽपीतेनाप्युपमानेन संबन्धोपपत्तेः ॥ अ
त्र प्राणोत्पत्तिवादि वाक्यजातमुदाहरणं ॥ अस्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्यु
च्चरन्तीत्येवं जातीयकं ॥ तत्र यथा लोकादयः परस्माद् ब्रह्मण उत्पद्यन्ते तथा प्राणा अपीत्यर्थः ॥ तथैतस्माज्जायते प्राणो
मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी सेवमादिष्वपि खादिवत् प्राणानामुत्पत्तिरिति

द्रष्टव्यं॥ अथवा पानव्यापच्च तद्वदित्येवमादिष्वव्यवहितोपमानसंबंधस्याश्रितत्वात्॥ यथातीतानंतरपादा
दावुक्ता वियदादयः परस्य ब्रह्मणो विकारा समधिगतास्तथा प्राणा अपि परस्य ब्रह्मणो विकारा इति योजयितव्यं॥ कः
पुनः प्राणानां विकारत्वे हेतुः॥ श्रुतत्वमेव॥ ननु केषुचित्प्रदेशेषु प्राणानामुत्पत्तिर्न श्रूयत इत्युक्तं॥ प्रदेशांतरेषु श्रू
यमाणत्वात्॥ न हि क्वचिदश्रवणमन्यत्र श्रुतन्निवर्त्तयितुमुत्सहते॥ तस्माच्छ्रुतत्वाविशेषादाकाशादिवत्प्राणा अप्यु
त्पद्यंत इति सूक्तं॥ गौण्यसंभवात्॥ यत्पुनरुक्तं प्रागुत्पत्तेः सद्भाववचनाद्गौणी प्राणानामुत्पत्तिश्रुतिरिति तत्प्रत्याह
गौण्यसंभवादिति गौण्या असंभवो गौण्यसंभवः॥ न हि प्राणानामुत्पत्तिश्रुतिर्गौणी संभवति प्रतिज्ञाहानिप्रसंगा
त् कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीत्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय तत्साधनायेदमाम्नाय
ते॥ एतस्माज्जायते प्राण इत्यादि॥ सा च प्रतिज्ञा प्राणादेः समस्तस्य जगतो ब्रह्मविकारत्वे सति प्रकृतिव्यतिरेकेण वि राम०
काराभावात्सिध्यति॥ गौण्यां तु प्राणानामुत्पत्तिश्रुतौ प्रतिज्ञा हीयेत॥ तथा च प्रतिज्ञातार्थमुपसंहरति॥ पुरुष एवेदं
विश्वं कर्म तपो ब्रह्म परामृतमिति॥ ब्रह्मैवेदं विश्वमिदं वरिष्ठमिति च॥ तथात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञाने

नेदं सर्वं विदितमित्येवं ज्ञातोपकार्यसृष्टिषु ॥ एषैव प्रतिज्ञा कोऽन्पि तत्र्याऽऽकृष्यं पुनः प्राणस्यान्तेः प्राणानां सृष्टावपवर्णं
नैतन्मूलप्रकृतिविषयं ॥ अपाणोऽह्यमनाः शुभ्रो ह्यक्षरात्परतः पर इति मूलप्रकृतेः प्राणादिसमस्तविशेषरहितत्वावधा
रणात् ॥ अवांतरप्रकृतिविषयं चेन्न तस्य विकारत्वे संप्राप्तस्मृतेः प्राणसृष्ट्यावधारणमिति द्रष्टव्यं ॥ व्याकृतविषयाणामपि
पि भूपसौ नामवस्थानां सृष्टिस्मृत्योः प्रकृतिविकारभावप्रसिद्धेः ॥ वियदधिकरणे हि गौणस्यसंभवादिति एवं पूर्वपक्षस्तत्र
त्वोक्तो गौणी जन्मसृष्टिरसंभवादिति व्याख्यातं ॥ प्रतिज्ञाहान्याच तत्र सिद्धांतोऽभिहितः ॥ इह तु सिद्धांतस्तत्रत्वोक्तो गौणाः
जन्मसृष्टेरसंभवादि व्याख्यातं ॥ तदनुरोधेन त्विहापि गौणी जन्मसृष्टिरसंभवादिति व्याचष्टे सा गौणी: प्रतिज्ञाहानिरूपेत्यसि
तास्मात् ॥ तत्प्राकृष्टेन्द्रिये ॥ इतत्स्मात्काशादीनामिव प्राणानामपि मुख्यैव जन्मसृष्टिः ॥ पञ्चापत्तरसेकं जन्मवाचि पदं
प्राणेषु प्राकृष्टं तत्तदुत्तरेष्वप्याकाशादिष्वनुवर्तते ॥ एतस्माज्जायते प्राण इति ॥ अत्र व्याकाशादिषु च मुख्यजन्मेति प्रति
ष्ठापितं ॥ तत्सामान्यात्प्राणेष्वपि मुख्यमेव जन्म भवितुमर्हति ॥ नत्वेकस्मिन् प्रकरणे कस्मिंश्चिद्वाक्ये एकः शब्दः सकृदु
दुच्चरितो बहुभिः संबध्यमानः क्वचिन्मुख्य° क्वचिद्गौण इत्यध्यवसातुं शक्यं ॥ वैरूप्यप्रसंगात् ॥ तथा स प्राणमसृजत प्रा

शा॰भा॰ णाच्छ्रद्धामित्यत्रापि प्राणेषु श्रुतः सृजतिः परेष्वप्युत्पत्तिमत्सु श्रद्धादिष्वनुषज्यते॥ यत्रापि पश्चाच्छ्रुत उत्पत्तिवचनः शब्दः पू
र्वैः संबध्यते॥ तत्राप्येष एव न्यायः। यथा सर्वाणि भूतानि व्युच्चरंतीत्यत्र व्युच्चरंतिशब्दः अंते पठितोपि पूर्वैरपि
प्राणादिभिः संबध्यते॥ तत्पूर्वकत्वाद्वाचः॥ यद्यपि तत्तेजोसृजतेत्यस्मिन्प्रकरणे प्राणानामुत्पत्तिर्न पठ्यते। तेजोब
न्नानामेव त्रयाणां भूतानामुत्पत्तिश्रवणात्। तथापि ब्रह्मप्रकृतिकतेजोबन्नपूर्वकत्वाभिधानाद्वाक्प्राणमनसां
तत्सामान्यात्सर्वेषामेव प्राणानां ब्रह्मप्रभवत्वं सिद्धं भवति॥ तथा ह्यस्मिन्नेव प्रकरणे तेजोबन्नपूर्वकत्वं वाक्प्रा
णमनसामाम्नायते॥ अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति॥ तत्र यदि तावन्मुख्यमेवैषामन्
नादिमयत्वं ततो वर्तत एव ब्रह्मप्रभवत्वम्। अथ भाक्तं तथापि ब्रह्मकर्तृकायां नामरूपव्याक्रियायां श्रवणात्॥ येना
श्रुतं श्रुतं भवतीति चोपक्रमात्। ऐतदात्म्यमिति चोपसंहारात्। श्रुत्यंतरप्रसिद्धेश्च ब्रह्मकार्यत्वप्रपंचनार्थमेव मनआदी एम०
नामन्नादिमयत्ववचनमिति गम्यते॥ तस्मादपि प्राणानां ब्रह्मविकारत्वसिद्धिः ४ सप्तगतेर्विशेषितत्वाच्च॥ ५
उत्पत्तिविषयः श्रुतिविप्रतिषेधः प्राणानां परिहृतः॥ संख्याविषय इदानीं परिहियते॥ तत्र मुख्यं प्राणमुपरिष्टाद्वक्ष्यति॥

संप्रतिपुरुकतोनतरेप्राणाइति संप्रधारयति॥ कुतोविप्रतिपत्तेस्मात्रविरोधः॥ कचित्सप्तप्राणाः संकीर्त्यन्ते॥ सप्तप्राणाः प्रभ
वन्तितस्मादिति॥ क्वचिदष्टौ प्राणाग्रहत्वेनगुणेनसंकीर्त्यन्ते॥ अष्टौग्रहाअष्टावतिग्रहाइति॥ क्वचिन्नवासप्तवैशीर्षण्याः
प्राणाः द्वाववाञ्चाविति॥ क्वचिद्दशनववैपुरुषेप्राणानाभिर्दशमीति॥ क्वचिदेकादश॥ दशेमेपुरुषेप्राणाआत्मैकाद
शइति॥ क्वचिद्द्वादश॥ सर्वेषांस्पर्शानांत्वगेकायनमित्यत्र॥ क्वचिदेकादश॥ दशेमेपुरुषेप्राणाआत्मैकादशइति॥
क्वचिद्द्वादश॥ एवंवैषांस्पर्शानांत्वगेकायनमित्यत्र॥ क्वचित्त्रयोदशाच सुष्मद्दृष्ट्वचेत्यत्र॥ एवंविप्रतिपन्नाः प्राणेयत्तां
प्रतिश्रुतयः॥ किंतावत्साम्प्रतमेवप्राणाइति॥ कुतः॥ पतस्तावत्॥ सप्तगम्यन्ते सप्तप्राणाः प्रभवन्तितस्मादित्येवंविधासु
श्रुतिषु॥ विशेषितास्वगते सप्तवैशीर्षण्याः प्राणाः इत्यत्र॥ ननुगुहाशयानिहिताः सप्तसप्तेति वीप्साश्रूयते सासप्तभ्यो
तिरिक्तानप्राप्राणाः इत्यत्र॥ ननुगुहाशयानिहिताः सप्तसप्तेतिवीप्साश्रूयते सासप्तभ्योतिरिक्तान्प्राणानगमयति॥
नैषदोषः॥ पुरुषभेदाभिप्रायेयंवीप्सा॥ प्रतिपुरुषंसप्तसप्तप्राणाइति॥ नतत्त्वभेदाभिप्रायासप्तान्येप्राणाइति॥ नन्वष्टत्वादि
संख्याप्राणोऽष्टादिषुहृतत्वाकथंसप्तैवस्युः॥ सत्यमष्टत्वादिहृतंविरोधादस्यत्वमासंख्याध्यचसप्ततया॥ तत्रस्तोकल्पनानुरोधात्सप्त

शा॰भा॰ संख्याध्यवसातव्या॥ तत्र लोककल्पनानुरोधात्तु मसंख्याध्यवसानं॥ हस्तिमेदायेसंचसंख्यांतरस्यश्रवणमितिगम्यते॥ अत्रो-
च्यते॥ हस्तादयपरस्थस्थितेतोनैवं॥ हस्तादयस्त्वपरेसप्तभ्योतिरिक्ताः प्राणाः श्रूयंते हातेवेयग्रहः सकर्मणातिग्रहेणाग्र-
हीतोहस्ताभ्यांहिकर्मकरोतीत्येवमाद्यासुश्रुतिषु॥ स्थितेचसप्तत्वातिरेकेसप्तत्वंमंत्रोभावाच्छक्यतेसंभावयितुं॥ हीना-
धिकसंख्याविप्रतिपत्तौत्वधिकसंख्याग्राह्या भवति। तस्यां हीनतरांतर्भवति॥ नतु हीनायामधिका॥ अतश्चैवं
मंतव्यं॥ लोककल्पनानुरोधात्सप्तैवप्राणाः स्युरिति॥ उत्तसंख्यानुरोधादेकादशैतेप्राणाःस्युः॥ तथा चोदाहृताश्रु-
तिः॥ दशेमेपुरुषेप्राणा आत्मैकादश इति॥ आत्मशब्देनचात्रांतःकरणंपरिगृह्यते॥ करणाधिकारात्॥ नन्वे-
कादशत्वादप्यधिकेहृदेशात्त्रपोदशत्वे उदाहृते॥ सत्यमुदाहृते॥ नत्वेकादशभ्यःकार्यजातेभ्यःअधिकंकार्यंजात-
मस्ति॥ यदर्थमधिकंकरणंकल्प्येत॥ शब्दस्पर्शरूपरसगंधविषयाःपंचबुद्धिभेदाः तदर्थानिपंचबुद्धींद्रियाणि॥ व- राम०
दनादानविहरणोत्सर्गानंदाःपंचकर्मभेदास्तदर्थानिपंचकर्मेंद्रियाणि॥ सर्वार्थविषयंत्रैकाल्यंचवृत्तिमनःए-
कमनेकवृत्तिकं तदेवहिवृत्तिभेदात्क्वचिद्भिन्नवद्व्यपदिश्यते॥ मनोबुद्धिरहंकारश्चित्तंचेति॥ तथाचश्रुतिः॥

कामाद्या नानाविधा वृत्तीरन्तःकरणस्य हेतुत्वं संवेदनस्येति॥ अपि च॥ सप्तैव शीर्षण्यान् प्राणानभिमन्यमानस्य चत्वार एव प्राणा
अभिमताः स्युः॥ स्थानभेदाद्ध्येते चत्वारः संतः सप्त गण्यंते॥ द्वे श्रोत्रे द्वे चक्षुषी द्वे नासिके एका वागिति॥ न च तावतामेव वृत्ति
भेदोऽस्तीतरे प्राणानुवृत्तिभाक्त्वं वक्तुं॥ हस्तादिवृत्तीनामसंतत विज्ञानोपकारत्वात्॥ तथा न वचैव पुरुषे प्राणा नाभिर्दशमी इति॥ अत्रापि
देहच्छिद्रभेदाभिप्रायेणैव दश प्राणा उच्यन्ते॥ न प्राणतत्त्वभेदाभिप्रायेण॥ नाभिर्दशमीति वचनात्॥ न हि नाभिर्नाम क
श्चित् प्राणः प्रसिद्धोऽस्ति॥ मुख्यस्य तु प्राणस्य भवति नाभिरप्येकं विशेषायतनमतो नाभिर्दशमीत्युच्यते॥ क्वचिदुपास
नार्थं केचित् प्राणा गण्यन्ते॥ क्वचित् प्रदर्शनार्थं॥ तदेवं विचित्रे प्राणेयत्ताम्नाने सति क्व किंपरमाम्नानमिति विवेक्तव्ये
॥ कार्यजातवशात्त्वेकादशत्वाम्नानं प्राणविषयं प्रमाणमिति स्थितं॥ इयमपरा सप्तत्वयोजना॥ सप्तैव प्राणाः स्युः
यतः सप्तानामेव गतिः श्रूयते॥ तमुत्क्रामंतं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामंतं सर्वे प्राणा अनूत्क्रामंतीत्यत्र॥ ननु सर्व
शब्दोऽत्र पठ्यते॥ कथं सप्तानामेव गतिः प्रतिज्ञायत इति विशेषितत्वादित्याह॥ सप्तैव हि प्राणा म्रुसुरोदपस्य कृपर्य
ता विशेषिता॥ इह प्रकृताः सप्तैव चाक्षुषः प्रद्योतः पराङ्पर्यावर्त्तते॥ तथा रूपज्ञो भवत्येकी भवति॥ न पश्यतीत्या

शा.भा. हरित्येवमादिनोत्क्रमणेन मृत्युगामी च सर्वशब्दो भवति यथा सर्वे ब्राह्मणा भोजिता इति ये निमंत्रितास्ते कृता ब्राह्म-
णास्त एव सर्वशब्देनोच्यंते नान्ये॥ एवमिहापि ये प्रकृताः सप्त प्राणाः त एव सर्वशब्देनोच्यंते नान्ये इति॥ नन्वत्र विज्ञानम
प्युक्तं कथं सप्तानामेवोत्क्रमणं॥ नैष दोषः॥ मनोविज्ञानयोः तत्त्वाभेदात् वृत्तिभेदेऽपि समत्वोपपत्तेः॥ तस्मात्सप्तै-
व प्राणा इत्येवं प्राप्ते ब्रूमः॥ हस्तादयस्त्वपरे सप्तभ्योऽतिरिक्ताः प्राणाः प्रतीयंते॥ हस्तो वै ग्रह इत्यादिश्रुतिभ्यः॥ ग्रहत्वं च
बंधनभावो गृह्यते॥ गृह्यते बध्यते क्षेत्रज्ञोऽनेन ग्रहसंज्ञकेन बंधनेनेति॥ स च क्षेत्रज्ञो नैकस्मिन्नेव शरीरे बध्यते॥
शरीरांतरेष्वपि तुल्यत्वाद्बंधस्य॥ तस्माच्छरीरांतरसंचारी ग्रहसंज्ञकं बंधनमित्यप्युक्तं भवति॥ तथा च स्मृतिः॥
पुर्यष्टकेन लिंगेन प्राणाद्येन स युज्यते॥ तेन बद्धस्य वै बंधो मोक्षो मुक्तस्य तेन वै॥ प्राङ्मोक्षात्तु ग्रहसंज्ञकेनानेन बं-
धनेनावियोगं दर्शयति॥ आथर्वणे च विषयेंद्रियानुक्रमणे चक्षुश्च द्रष्टव्यं चेत्यत्र तु सव हस्तादीनींद्रियाणि सवि- राम०
षयाण्यनुक्रामति॥ हस्तौ चादातव्यं चोपस्थश्चानंदयितव्यं च पायुश्च विसर्जयितव्यं च पादौ च गंतव्यं चेति॥ तथा दशेमे
प्राणा आत्मैकादशः॥ ते यदास्माच्छरीरान्मर्त्यादुत्क्रामंत्यथ रोदयंतीत्येकादशानां प्राणानामुत्क्रांतिं दर्शयति॥ सर्वशब्दो

पि च प्राणशब्देन संबध्यमानोंऽशो मुख्यप्राणान्न भिद्यते न प्रकरणवशेन सत्रस्यैवावस्थापयितुं शक्यते॥प्रकरणाच्छ्रु
तेर्बलीयस्त्वात्॥सर्वेन्द्रियाणामभिजितादृत्तत्रापि सर्वेषां गेहु वनिवर्तितानां इन्द्रियाणां ग्रहणं न्याय्यं सर्वशब्दसामर्थ्यात्॥सर्वे
भोजनासंभवात्तत्र निमित्तमात्रविषया सर्वशब्दस्य वृत्तिराश्रिता॥इह तु न किंचित्सर्वशब्दार्थसंकोचनकारणमस्ति॥तस्मा
त्सर्वशब्देनाशेषाणां प्राणानां नापरिग्रहः॥प्रदर्शनार्थं चैतत्सप्तानामनुक्रमणमिति मन्तव्यं॥तस्मादेकादशैव प्राणाः शब्द
तः कार्यतश्चेति सिद्धं ७१ अणवश्च॥अधुना प्राणानामेव स्वभावान्तरमभ्युच्चिनोति॥अणवश्चैते प्रकृताः प्राणाः प्रतिप
त्तव्याः अणुत्वं चैषां सौक्ष्म्यपरिच्छेदौ न परमाणुतुल्यत्वं कृत्स्नदेहव्यापिकार्यानुपपत्तिप्रसंगात्॥सूक्ष्मा एते प्राणाः॥
स्थूलाश्चेत्स्युः॥मरणकाले शरीरान्निर्गच्छन्तो बिलादहिरिवोपलभ्येरन्म्रियमाणस्य पार्श्वस्थैः॥परिच्छिन्नाश्चैते प्राणाः स
र्वगताश्चेत्स्युः॥उत्क्रांतिगत्यागतिश्रुतिकोपः स्यात्॥तद्गुणसारत्वं च जीवस्य न सिद्ध्येत्॥सर्वगतानामपि वृत्तिलाभः शरीर
देशे स्यात् इति चेत्॥न॥वृत्तिमात्रस्य करणत्वोपपत्तेः॥यदेव ह्युपलब्धिसाधनं वृत्तिरन्यद्वा तस्यैव नः करणत्वेन सं
ज्ञामात्रे विवाद इति करणानां व्यापित्वकल्पना निरर्थिका॥तस्मात्सूक्ष्माः परिच्छिन्नाश्च प्राणा इत्यध्यवसामः ८० श्रेष्ठ

शा॰भा॰ स्य मुख्यस्य प्राणस्येतरप्राणवद्ब्रह्मविकारत्वमतिदिशति ॥ अविशेषेणैव सर्वप्राणानां ब्रह्मविकारत्वमाख्यातं ॥ एतस्माज्जा
यते प्राणो मनः सर्वेन्द्रियाणि चेति ॥ सेन्द्रियमनो व्यतिरेकेण प्राणस्योत्पत्तिश्रवणात् सप्राणमसृजतेत्यादिश्रवणेभ्यश्च ॥ कि
मर्थं पुनरतिदेशः ॥ अधिकाशंकापाकरणार्थः ॥ नासदासीदिति ब्रह्मप्रधाने सूक्ते मंत्रवर्णो भवति ॥ न मृत्युरासीदमृतं न
तर्हि न रात्र्या अह्न आसीत्प्रकेतः ॥ आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किंचनासेति ॥ आनीदिति प्राण
कर्मोपादानात् प्रागुत्पत्तेः प्राणसद्भावं सूचयति ॥ तस्मादजः प्राण इति जायते कस्यचिन्मतिः ॥ तामतिदेशेनापनुदति
॥ आनीच्छब्देन प्रागुत्पत्तेः प्राणसद्भावं सूचयति ॥ अवातमिति विशेषणादिति ॥ अप्राणो ह्यमनाः शुभ्र इति च मूलप्रकृ
तेः प्राणादिसमस्तविशेषविरहस्य दर्शितत्वात् ॥ तस्मात्कारणसद्भावप्रतिपादनार्थ एवमानीच्छब्दः स्पष्ट इति च मु
ख्यं प्राणमभिदधाति ॥ प्राणावाक्ये एव श्रेष्ठश्च ज्येष्ठश्चेति श्रुतिनिर्देशात् ॥ ज्येष्ठः प्राणः शुक्रनिषेककालादारभ्य तस्य वृ
त्तिलाभात् ॥ न चेत्तस्य तावद्वृत्तिलाभः स्यात् योनौ निषिक्तं शुक्रं पूयेत न संभवेत् ॥ श्रोत्रादीनां तु कर्णशष्कुल्यादि राम॰
स्थानविभागनिष्पत्तौ वृत्तिलाभान्न ज्येष्ठत्वं श्रेष्ठश्च प्राणो गुणाधिक्यात् ॥ न वै शक्ष्यामस्त्वदृते जीवितुमिति श्रुतेः

२९ न वायुक्रिये पृथगुपदेशात् स पुनर्मुख्यः प्राणः किंस्वरूप इति इदानीं जिज्ञास्यते। तत्र प्राप्तं तावत् श्रुतेर्वायुः प्राण इति॥
एवं हि श्रूयते यः प्राणः स वायुः स एष वायुः पंचविधः प्राणोपानो व्यानो उदानः समान इति॥ अथवा तंत्रांतरीयाभिप्रायात्स
मस्तकरणवृत्तिः प्राण इति प्राप्तं॥ एवं हि तंत्रांतरीया आचक्षते॥ सामान्याकरणवृत्तिः प्राणाद्यावायवः पंचेति। अत्रोच्यते॥
न वायुः प्राणः॥ नापि करणव्यापारः। कुतः पृथगुपदेशात्॥ वायोस्तावत्प्राणस्य पृथगुपदेशो भवति॥ प्राण एव ब्रह्मणश्च
तुर्थः पादः। स वायुना ज्योतिषा भाति च तपति चेति न हि वायुरेव सन्वायोः पृथगुपदिश्येत। तथा करणवृत्तेरपि पृथगुप
देशो भवति॥ वागादीनि करणान्यनुक्रम्य तत्र तत्र पृथक् प्राणस्यानुक्रमणात्॥ वृत्तिवृत्तिमतोश्चाभेदात्॥ न हि करणव्या
पार एव सन्करणेभ्यः पृथगुपदिश्येत। तथैतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि च॥ खं वायुरित्येवमादयोपि वायोः
करणेभ्यः प्राणस्य पृथगुपदेशा अनुसर्तव्याः॥ न च समस्तानां करणानामेकावृत्तिः संभवति॥ प्रत्येकमेकैकवृत्तित्वात्॥
समुदायस्य चाकारकत्वात् ननु पंजरचालनन्यायेनैतद्भविष्यति। यथैकपंजरवर्तिन एकादश पक्षिणः प्रत्येकं प्रतिनि
यतव्यापाराः संतः संभूयैकं पंजरं चालयंति एवमेकशरीरवर्तिन एकादश प्राणाः प्रत्येकं प्रतिनियतव्यापाराः संतः संभूये

34

शा.भा. कंपंजरंचालयंति एवमेकशरीरवर्तिन एकादश प्राणाः प्रत्येकं प्रतिनियतवृत्तयः संतः संभूय एकां प्राणाख्यां वृत्तिं प्रति
लप्स्यंत इति॥ नेत्युच्यते। युक्तं तत्र प्रत्येकवृत्तिभिरवांतरव्यापारैः पंजरचालनानुरूपैरेवोपेताः पक्षिणः संभूय एकं पंजरं चा
लयेयुरिति॥ तथा दृष्टत्वात्। इह तु श्रवणाद्यवांतरव्यापारोपेताः प्राणा न संभूय प्राण्युरिति युक्तं॥ प्रमाणाभावात्॥ अत्य
त्यंतविजातीयत्वाच्च श्रवणादिभ्यः प्राणनस्य॥ तथा प्राणस्य श्रेष्ठत्वादि उद्घोषणं गुणभावोपगमश्चैनं प्रति वागादी
नां न करणवृत्तिमात्रे प्राणेऽवकल्पते॥ तस्मादन्यो वायुक्रियाभ्यां प्राणः। कथं तर्हीयं श्रु(ति वागादी)ति यः प्राणः
स वायुरिति॥ उच्यते॥ वायुरेवायमध्यात्ममापन्नः पंचव्यूहो विशेषात्मनावतिष्ठमानः प्राणो नाम भण्यते॥ न त
त्त्वांतरं नापि वायुमात्रं। अतश्चोभे अपि भेदाभेदश्रुती न विरुध्येते॥ स्यादेतत् प्राणोऽपि तर्हि जीववदस्मिंछरीरे स्वतंत्रः
प्राप्नोति श्रेष्ठत्वात् गुणभावोपगमाच्च तं प्रति वागादीनां तथा ह्यनेकविधा विभूतिः प्राणस्य श्राव्यते॥ सुप्तेषु वागा राम०
दिषु प्राण एको जागर्ति प्राण एको मृत्युनानाप्तः प्राणः संवर्गो वागादीन् संवृंक्ते प्राण इतरान् प्राणान् रक्षति माते
व पुत्रानिति तस्मात् प्राणस्यापि जीववत् स्वातंत्र्यप्रसंगः॥ तं परिहरति॥ चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः॥

तुशब्दः प्राणस्य जीववत् स्वातंत्र्यं व्यावर्त्तयति॥ यथा चक्षुरादीनि राजप्रकृतिवज्जीवस्य कर्तृत्वं भोक्तृत्वं च प्रतिकरणानि
न स्वतंत्राणि॥ तथा मुख्योपि प्राणो राजमंत्रिवज्जीवस्य सर्वार्थकरत्वेनोपकरणभूतो न स्वतंत्रः॥ कुतः॥ तत्सहशिष्ट्यादिभ्यः॥
तैश्चक्षुरादिभिः सहैव प्राणः शिष्यते प्राणसंवादादिषु समानधर्माणां च सह शासनं युक्तं॥ बृहद्रथंतरादिवत्॥ आदि
शब्देन संहतत्वाचेतनत्वादीन् प्राणस्य स्वातंत्र्यनिराकरणहेतून् दर्शयति॥ स्यादेतद्यदि चक्षुरादिवत्प्राणस्य जीवं
प्रति करणभावोभ्युपगम्येत॥ विषयांतरं रूपादिवत् प्रसज्येत॥ रूपालोचनादिभिर्हि वृत्तिभिः स्वेषां स्वेषां चक्षुरादीनां जी
वं प्रति करणभावो भवति॥ अपि चैकादशैव कार्यजातानि रूपालोचनादीनि परिगणितानि यदर्थमेकादश प्राणाः सं
गृहीताः॥ न तु द्वादशमपरं कार्यजातमधिगम्यते। यदर्थमयं द्वादशः प्राणः प्रतिज्ञायेतेति॥ अत उत्तरं पठति॥ अक
रणत्वाच्च न दोषस्तथा हि दर्शयति॥ न तावद्विषयांतरप्रसंगो दोषः। करणत्वात्प्राणस्य॥ न हि चक्षुरादिवत्प्राणस्य
विषयपरिच्छेदेन करणत्वमभ्युपगम्यते॥ न चास्यैतावता कार्याभाव एव कस्मात्तथा हि श्रुतिः॥ प्राणांतरेष्वसंभा
व्यमानं मुख्यप्राणस्य वैशेषिकं कार्यं दर्शयति॥ प्राणसंवादादिषु॥ अथ ह प्राणा अहंश्रेयसि व्यूदिरे रूपक्रमस्यास्मिंश्छरी

प्रा०भा०

महत्त्वं शरीरं पापिष्ठतरमिव हि दृश्यते॥ स वृक्ष एवेति चोपमा स एवमेकं वागाद्युत्क्रमणेन इति मात्रहीनं पश्याव वै जीवनं दर्शयद्
वाक्प्राणेन्द्रियक्रमिषां वागादीनां अपि सापत्तिं शरीरपातप्रसंगं च दर्शयन्ती श्रुतिः प्राणनिमित्तां शरीरेन्द्रियस्थितिं दर्शयति॥
तान्वरिष्ठः प्राण उवाच मा मोहमापद्यथ अहमेवैतत्पंचधात्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामीति च॥ एतमेवार्थमा
ति राजप्राणेन रक्षन्नवरं कुलायमिति च सुसमेष च सुप्तादिषु प्राणनिमित्तां शरीरस्थां दर्शयति॥ यस्मात्कस्माच्चांग
त्प्राण उत्क्रामति तदेव तच्छुष्यतीति॥ तेन यदश्नाति यत्पिबति तेनेतरान्प्राणानवतीति च प्राणनिमित्तां शरीरेन्द्रियस्थ
दर्शयति॥ कस्मिन्न्वहमुत्क्रान्ते उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजतेति च प्राणा
त्तिमित्ते जीवस्योत्क्रान्तिप्रतिष्ठे दर्शयति॥ पंचवृत्तिर्मनोवद्व्यपदिश्यते॥ इतश्चास्ति मुख्यस्य प्राणस्य वैशेषिकं कार्यजात
प्रकारं पंचवृत्तिं व्यपदिश्यते श्रुतिषु॥ प्राणोऽपानो व्यान उदानः समान इति॥ वृत्तिभेदस्यापं कार्यभेदापेक्षः॥ प्रा राम०
णः प्राग्वृत्तिरुच्छ्वासादिकर्मा अपानोऽवाग्वृत्तिर्निश्वासादिकर्मा व्यानस्तयोः संधौ वीर्यवत्कर्महेतुः उदानः ऊर्ध्ववृत्ति
रुत्क्रान्त्यादिहेतुः समानः समं सर्वेष्वङ्गेषु योऽन्नरसान्नयतीति॥ एवं पंचवृत्तिः प्राणः मनोवत्पश्यो मनसः पंचवृत्तयः

एवंप्राप्तास्यापोत्सर्गः॥ श्रोत्रादिनिमित्ताः शब्दादिविषयाः मनसः पंचवृत्तयः प्रसिद्धाः॥ ननु कामः संकल्पः इत्याद्याः परि
पठिताः परिगण्येरन्॥ पंचसंख्यातिरेकात्तन्न श्रोत्रापेक्षाश्रोत्रादिनिरपेक्षा मनसो विषयाः शब्दादिविषया एव मनसो वृत्तिरस्तीति
समाप्तः पंचसंख्यातिरेकः॥ एवं तर्हि परमतमप्रतिषिद्धमनुमतं भवतीति न्यायादिह योगशास्त्रप्रसिद्धा मनसः पंचवृत्तयः परि
गण्यंते॥ प्रमाणविपर्ययविकल्पनिद्रास्मृतयो नाम बहुवृत्तित्वमात्रेण वा मनःप्राणस्य निदर्शनमिति द्रष्टव्यं॥ जीवोपकर
णत्वमपि प्राणस्य पंचवृत्तित्वाद्राजामात्यवदिति योजयितव्यं ८२ अणुश्च अणुश्चायं मुख्यः प्राणः प्रत्येतव्य इतरप्राणवत् अणु
त्वं चेहापि सोस्य परिछेदो न परमाणुतुल्यत्वं पंचभिर्वृत्तिभिः कृत्स्नशरीरव्यापित्वात्॥ सूक्ष्मः प्राण उत्क्रान्तौ पार्श्वस्थैरना
नुपलभ्यमानत्वात् परिछिन्नश्चोत्क्रान्तिगत्यागतिश्रुतिभ्यः॥ ननु विभुत्वमपि प्राणस्य समाम्नायते समः प्लुषिणा समो
मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोनेन सर्वेणेत्येवमादिषु प्रदेशेषु॥ तदुच्यते आधिदैविकेन समष्टिव्यष्टि
रूपेण हैरण्यगर्भेण प्राणात्मना तद्विभुत्वमाम्नायते॥ नाध्यात्मिकेन॥ अपि च समं प्लुषिणेत्यादिना साम्यवचनेन
प्रतिप्राणिवर्तिनः प्राणस्य परिछेद एव प्रदर्श्यते॥ तस्माददोषः ज्योतिराद्यधिष्ठानं तु तदामननात्॥ ते पुनः प्रकृताः प्रा

णाः किं स्वमहिम्नैव स्वस्मै स्वस्मै स्वस्मै कार्योपक्रमं भवंत्याहोस्विद्देवताधिष्ठिताः प्रवर्तंतीति विचार्यते ॥ तत्र प्राप्तं तावद्यथा स्वं
कार्यापेक्षिणि योगात्स्वमहिम्नैव प्राणाः प्रवर्तेरन्निति ॥ अपि चादेवताधिष्ठितानां घ्राणानां प्रवृत्त्यावश्यमुपगम्यमानायां तासा
मधिष्ठात्रीणां देवतानां भोक्तृत्वप्रसंगः स्यात् । तस्य भोक्तृत्वं प्रलोपेत ॥ अतः स्वमहिम्नैवैषां प्रवृत्तिरित्येवं प्राप्तेऽस्माभिरुच्य
ते ॥ ज्योतिरादिभिरग्न्याद्यभिमानिनीभिर्देवताभिरधिष्ठितं वागादिकरणजातं स्वकार्येषु प्रवर्तत इति प्रतिजानीते ॥
हेतुं चाचष्टे ॥ तदामननादिति ॥ तथाह्यामनंत्यग्निर्वाग्भूत्वा मुखं प्राविशदित्यादि ॥ अग्न्याद्यभावे तु स्वप्रवेशस्य दे
वतात्मनाधिष्ठातृत्वसंगीकृतस्रोच्यते न हि देवतासंबंधे प्रत्याख्यायमाने कश्चित्स्वेवाकस्मिन्द्विरोषसंबंधो हृश्यते ॥ तथा
वायुः प्राणो भूत्वा नासिके प्राविशदित्याद्यपि योजयितव्यं ॥ तथान्यत्रापि वाग्वै ब्रह्मणश्चतुर्थः पादः सोऽग्निना ज्योति
षा भाति च तपति चेत्येवमादिना वागादीनामग्न्यादिज्योतिष्ट्ववचनेनैतमेवार्थं दर्शयति ॥ एवं चैषा चमेवत्र्यपमा रम॰
मत्स्यवहस्मायतामतमस्य मच्युत सोऽग्निर्भवति चैवमादिना वागादीनामग्न्यादिभावापत्तिवचनेनैतमेवार्थं उ
द्योतयति ॥ सर्वत्र चाध्यात्माधिदैवविभागेन वागाद्यग्न्याद्युक्रमणमनुपैव निर्देशः प्रमाणमस्मा भवति ॥ स्मृतावपि ॥ वा

गध्यात्ममितिप्राह ब्राह्मणान्तरवचनानि। वक्तव्यमक्षिमत्तं तु वन्हिस्तत्राधिदैवतमित्यादिना वागादीनामग्न्यादिदेवता
धिष्ठितत्वं सप्रपंचं दर्शितं। यदुक्तं स्वकार्यशक्तियोगात्स्वमहिम्नैव प्राणाः प्रवर्तेरन्निति तन्न सत्फलं।।शकटानामपि शकटा
दीनामनडुहाद्यधिष्ठितानां प्रवृत्तिदर्शनात्।।उभयथोपपत्तौ चागमाद्देवताधिष्ठितत्वमेवेति निश्चीयते।।यदप्युक्तं देव
तानामेवाधिष्ठात्रीत्वे भोक्तृत्वप्रसंगो न शारीरस्येति।।तत्परिह्रियते।।प्राणवता शब्दात्।।सतीष्वपि प्राणानामधीष्ठात्रीषु
देवतासु प्राणवता कार्यकरणसंघातस्वामिना शारीरेणैवैषां प्राणानां संबंधः श्रुतेरवगम्यते।।तथाहि श्रुतिः।।अथ यत्रै
तदाकाशमनुविषण्णं चक्षुः स चाक्षुषः पुरुषो दर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति स आत्मा गंधाय घ्राणमिति एवं
जातीयका शारीरेणैव प्राणानां संबंधं श्रावयति।।अपि च अनेकत्वात्प्रतिकरणमधिष्ठात्रीणां देवतानां न भोक्तृत्व
मस्मिंछरीरेऽवकल्पते।।एको ह्ययमस्मिंछरीरे शारीरो भोक्ता प्रतिसंधानादिसंभवादवगम्यते।।तस्माच्च नित्यत्वात्।।त
स्य च शारीरस्यास्मिन् शरीरे भोक्तृत्वेन नित्यत्वं पुण्यपापोपलेपसंभवात्सुखदुःखोपभोगसंभवाच्च।।न देवतानां ता
हि परस्मिन्नैश्वर्ये पदे वर्तमाना न हीनेऽस्मिंछरीरे भोक्तृत्वं प्रतिलब्धुमर्हंति।।श्रुतिश्च भवति पुण्यमेवामुं गच्छति न ह

शा॰भा॰ वैदेवान्मांयंगछंतीतिशारीरेष्वेवचनिसःप्राणानांसंबंधःउत्क्रांत्यादिश्रुतदत्रदृष्टतिदर्शनात्॥तमुत्क्रामंतंप्राणो
नूत्क्रामतिप्राणमनूत्क्रामंतंसर्वेप्राणाअनूत्क्रामंतीत्यादिश्रुतिभ्यः॥तस्मात्स्वतीष्वपिकरणानांनियंत्रीषुदेवतासुनशारी
रस्यभोक्तृत्वमपगच्छति॥करणपक्षस्यैवहिदेवतानभोक्तृपक्षस्येति॥२४ तइंद्रियाणितद्व्यपदेशादन्यत्रश्रेष्ठा
त्॥मुख्यश्चैकइतरेचैकादशप्राणाअनुक्रांताः तत्रेदमपरंसंदिह्यतेकिंमुख्यस्यैवप्राणस्यवृत्तिभेदाइतरप्राणाआहो
स्विन्नत्वांतराणीतिकिंतावत्प्राप्तंमुख्यस्यैवेतरेवृत्तिभेदाइति॥कुतःश्रुतेः॥तथाहिश्रुतिर्मुख्यमितरांश्चप्राणान्
संनिधाप्यमुख्यात्मतामितरेषांख्यापयतिहंतास्यैवसर्वेरूपमसामेतितएतस्यैवसर्वेरूपमभवन्नितिप्राणैकशब्द
त्वाच्चैकत्वाध्यवसायः॥इतरथाह्यन्याय्यमनेकार्थत्वंप्राणशब्दस्यप्रसज्येत॥एकत्रवामुख्यस्यतदितरत्रलाक्षणिक
त्वमापद्येत॥तस्माद्यथैकस्यप्राणस्यप्राणाद्याःपंचवृत्तयः॥एवंवागाद्याअप्येकादशेतिएवंप्राप्तेब्रूमः॥तत्वांतराण्येव राम॰
प्राणाद्वागादीनिकुतोव्यपदेशभेदात्॥कोव्यपदेशभेदःतेप्रकृताःप्राणाःश्रेष्ठंवर्जयित्वाअवशिष्टाएकादशेंद्रियाणी
त्युच्यंते॥श्रुतावेवव्यपदेशदर्शनात्॥एतस्माज्जायतेप्राणो(श्रेष्ठंवर्जयित्वा)मनःसर्वेंद्रियाणिचेतिह्येवंजातीयकेषु

प्रदेशेषु पृथक्प्राणो व्यपदिश्यते । पृथक्चेन्द्रियाणि ॥ ननु मनसोऽप्येवं सति वर्जनमिन्द्रियत्वेन प्राणवत् स्यात् मनः सर्वेन्द्रियाणि
चेति पृथग्व्यपदेशदर्शनात् ॥ सत्यमेतत् स्मृतौ त्वेकादशेन्द्रियाणीति मनसोऽपीन्द्रियत्वेन श्रोत्रादिवत् संग्रहणं ॥ प्राणस्य त्विन्द्रिय
त्वं न श्रुतौ न स्मृतौ वा प्रसिद्धमस्ति ॥ व्यपदेशभेदश्चायं तत्त्वभेद उपपद्यते ॥ तत्त्वैकत्वे तु स एवैकः सन् प्राण इन्द्रियव्यपदे
शं लभते न लभते चेति विप्रतिषिद्धं । तस्मात् तत्त्वान्तरभूता मुख्यादितरे ॥ कुतश्च तत्त्वान्तरभूताः ॥ भेदश्रुतेः ॥ भेदेन च वा
गादिभ्यः प्राणः सर्वत्र श्रूयते । ते ह वाचमूचुरित्युपक्रम्य वागादीनसुरविध्वस्तानुपन्यस्योपसंहृत्य वागादिप्रकरणमथ
हेममासन्यं प्राणमूचुरित्यसुरविध्वंसिनो मुख्यस्य प्राणस्य पृथगुपक्रमणात् ॥ तथा मनो वाचं प्राणं तान्यात्मनेऽकुरुते
त्येवमाद्या अपि भेदश्रुतय उदाहर्तव्याः ॥ तस्मादपि तत्त्वान्तरभूता मुख्यादितरे कुतश्च तत्त्वान्तरभूताः ॥ वैलक्षण्या
च्च ॥ वैलक्षण्यं च भवति मुख्यस्येतरेषां च सुप्तेषु वागादिषु मुख्य एको जागर्ति स एव चैको मृत्युनानाप्तः आप्तास्त्वितरे
तस्यैव च स्थित्युत्क्रान्तिभ्यां देहधारणपतनहेतुत्वं नेन्द्रियाणां विषयालोचनहेतुत्वं चेन्द्रियाणां ॥ न प्राणस्येत्येवंजातीय
को भूयाँल्लक्षणभेदः प्राणेन्द्रियाणां ॥ तस्मादप्येषां तत्त्वान्तरभावसिद्धिः ॥ यदुक्तं त एतस्यैव सर्वे रूपमभवन्निति श्रु

शा॰भा॰ तेः प्राणा एवेन्द्रियाणीति तदयुक्तं ॥ तत्रापि पौर्वापर्यालोचनाद्भेदप्रतीतेः ॥ तथा हि वदिष्याम्येवाहमिति ॥ वाग्दध्रे वागादी
नीन्द्रियाण्यनुक्रम्य तानि मृत्युः श्रमो भूत्वोपयेमे तस्माच्छ्राम्यत्येव वागिति च श्रमरूपेण मृत्युना ग्रस्तत्वं वागादीनामभि
धायाऽथेममेव नाप्नोद्योऽयं मध्यमः प्राण इति पृथक् प्राणं मृत्युनानभिभूतमनुक्रामति ॥ अयं वै नः श्रेष्ठ इति च श्रेष्ठताम
स्यावधारयति ॥ तस्मात्तदविरोधेन वागादिषु परिस्पन्दलाभस्य प्राणायत्तत्वं तद्रूपभवनं वागादीनामिति मन्तव्यं
न तादात्म्यं ॥ अत एव च प्राणशब्दस्येन्द्रियेषु लाक्षणिकत्वसिद्धिः ॥ तथा च श्रुतिः ॥ त एतस्यैव सर्वे रूपमभवन्तस्मादे
त एतेनाख्यायन्ते ॥ प्राणा इति मुख्यप्राणविषयस्यैव प्राणशब्दस्येन्द्रियेषु लाक्षणिकीं वृत्तिं दर्शयति ॥ तस्मात्तत्वान्तरा
णि प्राणादिन्द्रियाणि ॥ २५ संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥ ॥ सत्प्रक्रियायां तेजोबन्नानां सृष्टिं राम॰
विधायोपदिश्यते सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणी
ति तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति तत्र संशयः ॥ किं जीवकर्तृकमिदं नामरूपव्याकरणमीश्वरकर्तृकं वेति
तत्र प्राप्तं तावज्जीवकर्तृकमेवेदं नामरूपव्याकरणमिति ॥ कुतः ॥ अनेन जीवेनात्मनेति विशेषणात् यथा लोके चा

रेणाहं परमेश्वरस्तत्सृष्टविरूपं संकल्पयानीत्येवं मातोपके प्रयोगे चारकर्तृके कर्मैव सत्तमेऽस्मिन् संकल्पनं हेतुकर्तृकत्वात् स्वाज्ञान्तर्म
न्यध्यारोपयति संकल्पयानीत्यत्र णिजर्थप्रयोगेण॥एवं जीवकर्तृकमेव नामरूपव्याकरणं हेतुकर्तृकत्वाद्देवतात्मन्यध्यारोपय
ति व्याकरवाणीत्युत्तमपुरुषप्रयोगेण॥अपि च डित्थडवित्थादिषु नामसु घटशरावादिषु च रूपेषु जीवस्यैव व्याकर्तृत्वं दृष्टं॥त
स्माज्जीवकर्तृकमेवेदं नामरूपव्याकरणमित्येवं प्राप्तेऽभिधत्ते॥संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्॥तुशब्देन पक्षं व्या
वर्त्तयति॥संज्ञामूर्तिक्लृप्तिरिति नामरूपव्याक्रियेत्येतत्॥त्रिवृत्कुर्वत इति परमेश्वरं लक्षयति॥त्रिवृत्करणे तस्य
निरपवादकर्तृत्वनिर्देशात्॥येयं संज्ञाक्लृप्तिर्मूर्तिक्लृप्तिश्चाग्निरादित्यश्चन्द्रमा विद्युदिति॥तथा कुशकाशपलाशादि
षु गवाश्वमनुष्यादिषु च प्रत्याकृति प्रतिव्यक्ति चानेकप्रकारा॥सा खलु परमेश्वरस्यैव तेजोबन्नानां निर्मातुः कृतिर्भवितुमर्हति॥कु
तः॥उपदेशात्॥तथा हि सेयं देवतेत्युपक्रम्य व्याकरवाणीत्युत्तमपुरुषप्रयोगेण परस्यैव ब्रह्मणः कर्तृत्वमिहो
पदिश्यते॥ननु जीवेनेति विशेषणात् जीवस्य कर्तृत्वं व्याकरणे साध्यवसितं॥नैतदेवं॥जीवेनेत्येतदनुप्रविश्येत्यने
न संबध्यते॥आनन्तर्यात्॥न व्याकरवाणीत्यनेन॥तेन हि संबन्धे व्याकरवाणीत्ययं देवताविषय उत्तमपुरुष औपचारि

ॐ

39

छा०भा० कुतः कस्येति॥ न चा गिरिनदीसमुद्रेषु नानाविधेषु नामरूपेष्वनीश्वरस्य जीवस्य व्याकरणसामर्थ्यमस्ति॥ येषु सामर्थ्यं
तेष्वपि परमेश्वरायत्तमेव तत्॥ न च जीवो नाम परमेश्वरादत्यन्तभिन्नश्चार इव राज्ञः॥ आत्मनेति विशेषणात्॥ उपाधिमा
त्रनिबंधना ह्यस्य जीवभावस्य॥ तेन तत्कृतमपि नामरूपव्याकरणं परमेश्वरकृतमेव भवति॥ परमेश्वर एव च नामरूपयो
र्व्याकर्तेति सर्वोपनिषत्सिद्धांतः॥ आकाशो वै नाम नामरूपयोर्निर्वहिता तेमादिश्रुतिभ्यः॥ तस्मात्परमेश्वरस्यैव
त्रिवृत्कुर्वतः कर्म नामरूपव्याकरणं॥ अपि च त्रिवृत्करणपूर्वकमेवेदमिह नामरूपव्याकरणं विवक्ष्यते॥ प्रत्येक
नामरूपव्याकरणस्य तेजोवन्नोत्पत्तिवचनेनैवोक्तत्वात्॥ तच्च त्रिवृत्करणमग्न्यादित्यविद्युत्सु श्रुतिर्दर्शयति॥ यद
ग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्येत्यादिना॥ तत्राग्नेरिति त्रीणि रूपं व्याक्रियते॥ सति च रू
पव्याकरणे विषयप्रतिलंभात् अग्निरितीदं नाम व्याक्रियते॥ एवमेवादित्यचंद्रविद्युत्स्वपि द्रष्टव्यम्॥ अनेन चाग्न्यादिदृ रम०
ष्टान्तेन भौमाम्भसतैजसेषु त्रिष्वपि द्रव्येष्वविशेषेण त्रिवृत्करणमुक्तं भवति॥ उपक्रमोपसंहारयोः साधारणत्वा
त्॥ तयोरविशेषेणोपक्रमस्तु इमास्तिस्रो देवतास्त्रिवृदेकैका भवदिति॥ अविशेषेणैवोपसंहारः॥ यदु रोहि

तेमिवामह इति तेनसमस्तद्रूयमित्येवमादिः ॥ यदविज्ञातमिवामह इत्येतासामेवदेवतानां समासइत्येव मंत्रः ॥ ता तासां त्रिस
र्णां देवतानां बर्हिर्लिङ्गत्वेतानां सन्नीनोमध्यात्ममपरं त्रिष्टुत्करणमुक्तं ॥ इमा स्तिस्रोदेवतास्वरूपप्राप्यत्रिष्टुत्त्रिष्टुदेके
को भवति ॥ तदिदं दर्शनीमाचार्योयथास्मै दर्शयति आशंकितं कविद्दृष्टं पयोरहरिष्यन्मांसादि भो मंयपात्राब्देमि
तरेयोम्रा ॥ मसौम्लिङ्गत्वेतायाः पुरुषेणोपपसुमानायाः मांसादिका पंयपात्राब्देनिष्यघते ॥ तथाहि श्रुतिः ॥ अ
न्नमशितंत्रेधाविधीयते ॥ तस्ययस्थविष्टोधातुस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनइति त्रिष्टुत्त्वात्माम
मिरेवैषां ब्रीहियवाद्यन्नरूपेणविपरिणमत इत्यभिप्रायः ॥ तस्याम्रस्यविष्टंरूपं च ॥ स्वभावेनवहिर्निर्गच्छति मध्यम
मध्यात्मं मांसं संवर्द्धयति ॥ अणिष्ठं तु मनः ॥ एवमितरयोरप्यतेनसोपयपात्राशब्दं कार्यमवगंतव्यं ॥ मंत्रेलोहितंप्राणस्त्रा
यां कार्यं ॥ अस्थिमज्जावाकू तेजः सइति ॥ अत्राह ॥ यदि सर्वमेवत्रिष्टुत्त्वं तन्मतंभोतिकं अविशेषप्रसक्तेः ॥ तासां त्रिवृत्
त्वंत्रिवृत्त्वमेकैकां अकरोदिति किं कृतस्तर्हि पंचविशेषव्यपदेश इत्यत्र जरत्मा आपरहमलमिति ॥ तथाध्यात्ममिद
मन्नस्य कार्यं मांसादि इत्यमपाथो ता नाकार्यं लोहितादितेनसो शितस्य कार्यमस्थादीति ॥ अत्रोच्यते ॥ वैशेष्यात्तु

शा॰भा॰ तद्वादस्तद्वादः॥ तुशब्देनानुचोदितं दोषमपनुदति॥ विशेषभावो वैशेष्यं भूयस्त्वमिति यावत्॥ सत्यपि त्रिवृत्करणे क्व
चित्कस्यचिद्भूतधातोर्भूयस्त्वमुपलभ्यते॥ अग्नेस्तेजोभूयस्त्वमुदकस्याब्भूयस्त्वं पृथिव्या अन्नभूयस्त्वमिति॥
व्यवहारप्रसिद्ध्यर्थं चेदं त्रिवृत्करणं॥ व्यवहारश्च त्रिवृत्कृतरज्जुवदेकत्वापत्तौ सत्यां न भेदेन भूतत्रयगोचरो
लोके प्रसिद्ध्येत्॥ तस्मात्सत्यपि त्रिवृत्करणे वैशेष्यादेव तेजोबन्नविशेषवादो भूतभौतिकविषय उप
पद्यते तद्वादस्तद्वाद इति पदाभ्यासोऽध्यायपरिसमाप्तिं द्योतयति॥ इति श्रीमच्छारीरकमीमांसाभाष्ये शंकरभ
गवत्पादकृतौ द्वितीयस्याध्यायस्य चतुर्थः पादः॥ ॥ श्रीगुरुदेवदत्त श्रीगुरुदेव॥ ॥ रामराम राम राम॰

वेदांत